राधावल्लभ त्रिपाठी

महाकवि - नीलकण्ठदीक्षित - प्रणीतम्

मुकुन्दविलास - महाकाव्यम्

सम्पादक :

डॉ० राधावल्लभः त्रिपाठी

R/502

राधावल्लभ त्रिपाठी

श्री नीलकण्ठ-दीक्षित-प्रणीतम्

मुकुन्द-विलास-महाकाव्यम्

सम्पादकः

डॉ० राधावल्लभः त्रिपाठी

अध्यक्षः, संस्कृत-विभागस्य

सागर-विश्वविद्यालयः, सागरम् (म० प्र०)

प्रकाशकः

संस्कृत-परिषद्

विश्वविद्यालयः, सागरम्-४७०००३

प्रथम संस्करणम्

ख्रिस्ताब्दाः १८८०

मूल्य : १५ रूप्यकाः

मुद्रकः
एकेडमी प्रेस
दारागंज, इलाहाबाद

भूमिका

अथेदमुपायनीक्रियते सुरसरस्वतीसमाराधकेभ्यः साहित्यरसिकेभ्यो वश्चवाचः महाकवेर्नीलकण्ठस्य वैदग्ध्यविलासभूतं मुकुन्दविलासं नाम महाकाव्यम्। अपूर्णं सदपि काव्यमिदं सहृदयहृदयानि रसपरिपूर्णानि विधातुमलमिति इदम्प्रथमतया प्रकाश्यते।

मातृका-विवरणम्

काव्यस्यास्य साकल्येन तिस्रो मातृका उपलभ्यन्ते। तद्यथा—

(१) 'क'—प्रतिलेखः—ग्रन्थलिपौ अड्यारहस्तलिखितग्रन्थालयेऽयं विद्यते। अड्यारपुस्तकालयस्य ग्रन्थसूच्यामेतद्विषयेऽधोविधं विवरणं प्राप्यते—

Palmyra leaves, Foil 12. Old worm-eaten and injured. Good medium grantha writing. Incomplete. Cantos I to IV of the poem which gives the story of s'rī-kṛṣṇa ends :

उल्ललास कलरक्तवल्ल-ीगानमार्दवलयानुसारिभिः।
हस्ततालविनदानुमोदितैः शङ्खकङ्कणरवैर्न जोऽखिलः॥

The manuscript breaks off abruptly at the end of verse 15th of Canto IV. Other Cantos are complete. [1]

(२) ख—प्रतिलेखः—अयं प्रतिलेख उपर्युक्तमूलमातृकाया एव देवनागरीलिप्यन्तरभूतस्तस्मिन्नेव ग्रन्थागार उपलभ्यते। प्रतिलिपिश्चेयं अड्यारपण्डिताभ्यां श्रीवेङ्कटशर्म-रामनाथशास्त्रिभ्यां १८२६ तमे ख्रिस्ताब्दे कृता।

(३) ग—प्रतिलेखः—अयमपि प्रतिलेखः क—मातृकाया देवनागरीलिप्यन्तरभूतो मद्रासनगरस्थ-शासकीयहस्तलिखित-ग्रन्थागारे निहितः। एतत्पुस्तकालयस्य विवरणात्मक-सूच्यां काव्यस्यास्य विषय उक्तम्—

---

1. Descriptive Catalogue of Sanskrit Manuscripts in the Adyar Library, Adyar. Vol. II, p. 200.

"The Subject matter of this poem is Kṛṣṇa, his birth and the leading incidents of his life. The author of this work is supposed to be the famous Nilakantha Diksita, the author of Nilakantha vijaya, S'ivalīlārṇava etc. This author prostrates his father Narayana Diksita. This work is mentioned in the introduction of his other work Nalacarita Nāṭaka. Since it is an incomplete copy, the extent of this work is not known. This is different from the Mukundavilāsa of Raghunātha, Bhagavanta etc.

Breaks off in course of the fourth sarga.[1]

अस्मिन् संस्करणे 'ख'—प्रतेरूपयोगः कृतः। एतत्कृतेऽद्यारग्रन्थागाराधिकारिणः प्रति भृशमधमर्णतां ज्ञापयामि।

मुकुन्दविलास-नामानि काव्यानि

'मुकुन्दविलास' इति नाम्ना अन्यान्यपि काव्यान्युपलभ्यन्ते। तेषां प्रणेतारः नीलकण्ठदीक्षितात् विभिन्नाः। तथाहि—

(१) श्री हरप्रसादशास्त्रिणां मतेन मुकुन्दविलासनामकमेकं काव्यं रघूत्तमतीर्थप्रणीतं विद्यते। काव्यमिदं बाणपुरनरेशाय श्रीमज्जगन्नाथदेवाय समर्पितम्।[2] अस्यैका प्रतिः कालिकातायाम् एशियाटिक-सोसायटी-ग्रन्थागारे विद्यते।[3] काव्यमिदं दशसर्गात्मकम्।

(२) मुकुन्द-विलास-नाम्ना अपरं काव्यं श्रीभगवन्त-विरचितं विद्यते। अस्य मातृका तञ्जौर ग्रन्थागारे प्राप्यते।[4]

तञ्जौरग्रन्थालये नीलकण्ठस्य चतुर्णां लघुकाव्यानां द्वयोर्महाकाव्ययोश्च मातृका रक्षिताः, न पुनर्मुकुन्दविलासमातृकाया उल्लेखस्तत्सूच्यां प्राप्यते।[5]

---

1. "A Triennial Catalogue of Manuscripts at Govt. Oriental Institute Library, Madras, Vol. X. C. p. 8466
2. Catalogus Catalogorum, Theodor Anfrecht, Leipzeig, 1896, Part II p. 166
3. Sanskrit Manuscripts in Collection of Asiatic Society of Bengal, Calcutta, 1939, Ed. M. M. Harprasad shastri.
4. Catalogus Catalogorum, 1891, p. 459.
5. Descriptive Catalogue of Sanskrit Manuscripts, Tanjore, Vol. VII, 1930 Nos. 3757.

कवि-परिचयः

सप्तदशस्त्रिस्तशतकभवः कविर्नीलकण्ठः कैश्चिदनन्यसामान्यविशेषैः सविशेषं संस्कृतसाहित्यानुशीलननिरतानामनुसन्धातृणां चेतांसि आकर्षति। भास्करप्रभेव भास्वराऽस्य प्रतिभा लघुकाव्यमहाकाव्य-नाटक-चम्पू-प्रभृति-विविध-काव्यविधा विषयीकुर्वन्ती सर्वतोमुखं समुज्ज्वलं चकासे। अयं सुप्रथितानां पण्डितानामभिजातेऽन्वये जनिमलभत। दक्षिणदेशेषु श्रीमति भरद्वाजान्वये कृतावतारा वाग्देव्याः साक्षादवतारा इव, महामीमांसकाः विद्यावारिधयः श्रीदप्पयदीक्षितेन्द्रा नीलकण्ठस्य पितामहानां पण्डितेन्द्र-श्रीमदच्चादीक्षितमहाभागानां ज्येष्ठ-भ्रातरोऽभूवन्। आसीद् येषां शेमुषी पूर्वोत्तरमीमांसयोरनितरसाधारणनैपुणीजुषी, भक्तिश्च भूरिभावभरिता भगवति नीलकण्ठेऽभवत्। व्याकरणशिरोमणिः श्रीमान् भट्टोजी दीक्षितो तेषां सविनयं शिष्यतां जग्राह। इमे महाभागाः कुवलयानन्दचित्रमीमांसादि चतुरधिकशतप्रबन्धनिर्वाहिकाः पाण्डित्येन प्रथिताः पूज्यन्तेऽद्यापि दाक्षिणात्येषु। नीलकण्ठदीक्षितश्चैतेषां विषये स्वीये शिवलीलार्णवमहाकाव्ये निजगाद—

कालेन शम्भुः किल तावतापि
कलाश्चतुष्षष्टिमिताः प्रणिन्ये।
द्वासप्ततिं प्राप्य समाः प्रबन्धा-
ञ्छतं व्यधादप्पयदीक्षितेन्द्रः॥—शिव० १।३

अस्य च श्रीमदप्पयदीक्षितस्य यवीयान् सहोदरः पण्डितवरः श्री अच्चा-दीक्षित आसीत्। पाण्डित्येन कामप्यभिख्यां पुष्णन् श्री नारायणाध्वरिरस्य एक एव तनयो बभूव, यश्च साहित्यरत्नाकरमहावीरचरितादि—प्राचीन-ग्रन्थान् व्याचष्टे। नारायणस्य पञ्च पुत्रा अभूवन्,—तेषु श्री नीलकण्ठो द्वितीयः। अस्य चत्वारोऽपि सहोदराः सुकवयो बभूवुः, तेषु कुशकुमुद्वतीनाटकस्य प्रबन्धा अतिरात्रयज्वेति नाम्ना ज्ञायते। एवममलं सुप्रथितं चासीन्नीलकण्ठकवेः कुलम्, यच्च स्वयमेव तेन स्वनलचरित्रनाटके विस्तरशो वर्णितम्—

पारिपार्श्विकः—अस्य किल कूटस्थाः साक्षात्कृतब्रह्माणः सर्वविद्यामुखाश्छन्दोगाः सोमपीथिनोऽद्वैतवादासहिष्णवो वंशजा जगद्विदिता एव। अमीष्वपि विशेषस्तत्रभवानच्चादीक्षितः।

सूत्र०— तस्य किल कृष्णराजवन्दितचरणारविन्दस्य भरद्वाजकुलचूडामणेरष्टभिः क्रतुभिरष्टभिरायतनैः शम्भोरष्टभिर्ग्रामैरष्टभिस्तटाकैरष्टभिश्च सर्व-

विद्याविशारदैस्तनयैरष्टापि दिशो यशोभिर्ज्वलिताः। तस्य पञ्चमः सूनूरद्वैतविद्यामुकुर-विवरण-दर्पणाद्यनेकप्रबन्धनिर्माता शीलित एव रङ्गराजाध्वरी।

पारि०— शीलित एव। तस्य तपःपरिपाकफलमखिलराजकमौलिविश्रान्तशासनश्चतुरधिकशतप्रबन्धनिर्माणसाहसी श्रीकण्ठमतनिर्वाहधुर्वहः श्रीमानप्पाध्वरी।

सूत्र०— ज्ञायते स कल्पतरुं व्याचक्षाणः सरसकविना यदस्तूयत बालकविना—

अप्पयदीक्षित किमित्यतिस्तुतिं वर्णयामि भवतो वदान्यताम्।
सोऽपि कल्पतरुरर्थलिप्सया त्वद्गिरामवसरं प्रतीक्षते॥

पारि०— न केवलं तदेव। तदपि ज्ञायते यदेष शिवार्कमणिदीपिकावसानलब्धकनकस्नानः प्रशंसितः साहित्यमार्गसम्प्रदायगुरुणा कविना समरपुङ्गवयज्वना—

हेमाभिषेकसमये परितो निषण्णा
सौवर्णसंहतिमिषाच्चिनबोम्मभूपः।
अप्पय्यदीक्षितमणेरनवद्यविद्या-
कल्पद्रुमस्य कुरुते कनकालवालम्॥७

सूत्र— तत्सौन्दर्यस्य विद्वत्कवेरच्चादीक्षितस्य महिमा केन वर्ण्यते। तथापि किञ्चिद् वर्णितं गुरुराम-कविना—

शब्दब्रह्मजगाहुषी जगृहुषी वैशेषिकं साहुषी
तर्कोन्मर्दमुपेयुषी श्रुतिशिखां भाट्टे पदं दाशुषी।
साङ्ख्यार्थानधिजग्मुषी विविदुषी साहित्यमर्माखिलं
कस्मिन्नस्य हि शेमुषी नृपसभे नापूपुषद् वैदुषीम्॥८॥

इति। तस्य पौत्रः साहित्यरत्नाकर-महावीरचरितादिप्रबन्धव्याख्यातुः कविलोकचूडामणेरम्बिकापुरुषावतारस्य तत्रभवतो नारायणाध्वरिणो द्वितीयनन्दनो भूमिदेवीगर्भसम्भवः कविर्नीलकण्ठः प्रणेताऽस्य प्रबन्धस्य।

···· उक्तं च तेनैव कविना—

चन्द्रशेखरव्यासङ्गचरणोन्मार्जनाम्भसाम्।
विवर्ता जगदुत्सङ्गे विहरन्ति मदुक्तयः।९
नारायणाध्वरीन्द्राय नमोऽस्तु ज्ञानसिन्धवे।
शारदा यत्कटाक्षाणां साप्यवेतनकिंकरा॥१०॥

एतादृश-पण्डितानामन्वये जातस्य श्रीनीलकण्ठस्य विद्याध्ययनं संस्काराश्च तदनुरूपा भवेयुरित्यवगम्यत एव। तथाहि—महापण्डितः श्रीमदप्पयदीक्षितः स्वयमेनं विविधविद्या ग्राहयामास, यथा चानेन स्वयमेव स्वज्येष्ठपितामहस्य अप्पयस्य विषय उक्तम्—स्वनिर्मिते व्यागराजस्तवेः—

'योऽतनुतानुजसूनुजमनुग्रहेणात्मतुल्यमहिमानम् ''

एतादृशन्यामनुग्रहस्य हेतोर्नीलकण्ठस्य मनसि सातिशया श्रद्धा सर्वदा अप्पयदीक्षितमहाभागेभ्योऽवर्धत। प्रायशः स्वकृते प्रत्येकस्मिन् काव्येऽनेन स महाभाग उपश्लोकितः। गङ्गावतरणमहाकाव्येऽसावाह—

मुनिरस्ति भरद्वाजः ख्यातस्त्रिभुवनेष्वपि।
अन्वर्थस्य जहौ रामोऽप्यरण्यभ्रमणश्रमम् ॥
तस्यान्वये महत्यासीत्क्षीरोद इव चन्द्रमाः।
श्रीकण्ठचरणासक्तः श्रीमानप्पयदीक्षितः ॥
विधित्रयी यदाक्षिप्ता नान्यत्र लभते गतिम्।
जयन्त इव दुर्दान्तजानकीशशरार्दितः ॥
आगमैरप्यनवेद्यमाद्यं यत् तत्त्वमैश्वरम्।
आकुमारं परिज्ञातं तदेवासीद्यदुक्तिभिः ॥
श्रीकण्ठदेशिकग्रन्थसिद्धान्तद्योतचन्द्रिका।
श्रीमती निर्मिता येन शिवार्कमणिचन्द्रिका ॥
गङ्गया यः पुरा स्नातो देवश्चन्द्रार्धशेखरः।
गाङ्गेयेन पुनः सस्नौ सोऽवतीर्य यदात्मना ॥
अमोघणीयैरक्रय्यैरमूल्यैरमलीमसैः।
यत्प्रबन्धैः शतेनैव भारती परिकर्मिता ॥
यं विद्य इति यद् ग्रन्थानभ्यस्यामोऽखिलानिति।
यस्य शिष्याः स्म इति च श्लाघन्ते स्वं विपश्चितः ॥
नाकेऽपि सति देवानां माहात्म्यकलहे मिथः।
वादः शाम्यति यद् वाचि विन्यस्य निखिलं भरम् ॥
आमोदिभिर्वचःपुष्पैरर्चितो येन शंकरः।
तत्याज काशधत्तूरधारणोपहितां रुजम् ॥ गं० १।३८-४७

तथैव शिवोत्कर्षमञ्जर्याश्चरमे पद्येऽप्यनेनोक्तम्—

लीढालीढपुराणसूक्तिशकलावष्टम्भसम्भावना—
पर्यस्तश्रुतिसेतुभिः कतिपयैर्नीते कलौ मान्द्रताम्।
श्रीकण्ठोऽवतार यस्य वपुषा कल्क्यात्मनेवाच्युतः
श्रीमानप्पयदीक्षितः स जयति श्रीकण्ठविद्यागुरुः ॥

न केवलमेतदेव, गङ्गावतरण-शिवलीलार्णवमहाकाव्ययोः प्रतिसर्गान्ते श्रीमद्-भरद्वाजकुलजलधिकौस्तुभ – श्रीकण्ठमतप्रतिष्ठापनाचार्य-चतुरधिकशत--प्रबन्धनिर्वाहक – महाव्रतयाजीत्यादिविशेषणैरलङ्कृत्य अप्पयदीक्षतोऽनेन सबहुमानं स्मृतः। वस्तुतः काव्यसर्जनायामपि कविरयमप्पयमेव प्रेरणास्रोतः कलयामास। उक्तमनेन गङ्गावतरणमहाकाव्यं पूरयता –

> वाचं व्याकुरुते चिरन्तनगिरं मीमांसते चोभयीं
> पान्थः काव्यपथेषु पादकमले सक्तः पुरारेरिति।
> मामेतत्कथयिष्यतीति रचितं काव्यं मया तत्पुन--
> स्तावद् वक्ष्यति वा न वा तदुपरि न्यस्तः समस्तो भरः ॥ ८।९२

तथैव स्वपितरं नारायणदीक्षितं प्रत्यपि आसीदस्य कवेः कापि बहुमान-भावना। उक्तमनेन मुकुन्दविलासे –

> नमोऽस्तु नारायणदीक्षितेभ्यो न केवलं ये जनका ममैव।
> किन्तु त्रयाणामपि विष्टपानां गृहाश्रमेऽप्यात्मरहस्यबोधात् ॥ १.५

एतादृशं पितरं, पितामहं, तज्ज्येष्ठभ्रातरं च प्राप्य सफलमेवास्यैहलौ-किकं जीवनं भवेदिति युज्यत एव। यथा श्रीमदप्पयदीक्षितः भूपालमौलिमा-लालालितचरणयुगलो युगवन्द्योऽभवत्, तथैवायमपि मधुरानगर्यां तिरुमलै-नायकस्य भूयतेः सदसि पण्डितसार्वभौमोऽमात्यप्रवरश्चाभूत्। अय्यादीक्षित इति नामान्तरमस्य। अद्याप्ययं दाक्षिणात्येषु नाम्नाऽनेन स्मर्यते।

यथा नीलकण्ठस्य पितरस्तथैवाऽस्य भ्रातरस्तनयाश्चापि विद्यासु निष्णाताः सुकवयश्चाभूवन्। अस्य भ्रातृषु अतिरात्रयज्वा कुशकुमुद्वतीनाटकं प्रणिन्ये।[1] तथैवास्य तृतीयः पुत्रः श्रीगीर्वाणेन्द्रः शृङ्गारकोशभाणम्, अन्या-पदेशशतकं च रचयामास।[2] तथापि कवित्वेन समग्रेऽपि भरद्वाजान्वये यादृशी नीलकण्ठस्य प्रतिष्ठा न तादृशी अन्यस्य कस्यचित्। इदं चास्य प्रतिष्ठाया महत् प्रमाणं यत् स्वयमेवास्य ज्येष्ठो भ्राता एतद्विरचितं नलचरित्रनाटकमाटी कते स्म।[3]

---

१. गङ्गावतरणमहाकाव्यम् (काव्यमाला ७६), भूमिका, पृ० ११
अन्येषां भातृणां नामानि न ज्ञायन्त इति कुप्पूशास्त्रिणामुक्तिरयुक्तैव, नलचरित्र-नाटके आच्चादीक्षितस्योल्लेखात्। अस्यैकोऽनुजः श्रीचिन्नाप्पय आसीत्।

२. History of Sanskrit Literature : M: krishnamachari, p, 236

३. नलचरित्रनाटके—**'अग्रजन्मा खलु तस्य रसिकलोकमौलिमणिराच्चादीक्षितो व्याकरोदिदं रूपकमनुजस्नेहात्।'** बालमनोरमासं पृ० ५

न केवलं कवित्वे, शास्त्रानुशीलनेऽप्यासाधारणीं नैपुणीं महाकविर्नीलकण्ठोऽदर्शयत्। अयमप्पयदीक्षितवत् श्रीकण्ठमतसर्वस्ववेदी समाम्नायते। श्रीमति शैवसिद्धान्ते सुदृढोऽस्याभिनिवेशः। अप्पयदीक्षितादनन्तरमयमद्वैतविद्याचार्यस्य चोलनृपतिद्वयस्याच्युतनायक-रघुनाथभूपालयोः प्रधानामात्यस्य साग्निचित्यसर्वतोमुखातिरात्रसाग्निचित्याप्तवाजपेययाजिनः श्रीगोविन्ददीक्षितस्य तनयात् साग्निचित्याप्तवाजपेयाजिनो वासिष्ठवंशोद्भवात् श्रीवेङ्कटेश्वरमखिनः सविशेषं विद्यां जग्राह, तदनुग्रहं च गङ्गावतारावतरणे इत्थं व्यक्तवान्—

वर्तिकामरणग्रन्थनिर्माणव्यक्तनैपुणः ।
श्रीवेङ्कटेश्वरमखी शिष्ये मय्यनुकम्पते ॥
कुर्वती श्रवणे वाणी कोमलां यस्य साहितीम्।
कर्णपूरशिरीषेऽपि काठिन्यमिव पश्यति ॥
भान्ति शिष्याः पुरो यस्य पाणिविन्यस्तपुस्तकाः।
तत्सूक्तिजाह्नवीपूरत्रासेनेव धृतप्लवाः ॥ १।५१-५३

अस्य कवेर्जीवनकालः सप्तदशख्रिस्तशतकस्य पूर्वभाग इति निश्चीयते, तत्कृतनीलकण्ठविजयचम्प्वा उल्लेखात्। उक्तं हि तत्रानेन—

अष्टत्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु ।
कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम् ॥

एतेन इयं चम्पूरनेन १८३७ तमे ई० वर्षे विरच्य समाप्तिं नीतेति गणनया ज्ञायते।[1] श्रीशिवानन्दयोगीन्द्रकृतोल्लेखेन नीलकण्ठः स्वयं तिरुमलनायकस्य (१६२३-१६५८ ई०) भूपतेरभिषेक-महोत्सवे पौरोहित्यं निरुवाह। अयं च पञ्चत्रिंशद्वर्षान् तिरुमलनायकस्य साचिव्यं कुर्वन् दीर्घमायुष्यमभूभुजत्। आसंश्चास्य सुयोग्याः दीक्षितान्वयभूषणा विद्यासु दीक्षिताश्चत्वारः पुत्राः। तेषु त्रयाणां नामानि समरपुङ्गवातिरात्रयज्व-रङ्गकेत्विति निर्णीयन्ते।[2] दिवङ्गते तिरुमलनृपतौ नीलकण्ठोऽवशिष्टमायुः संन्यस्तो निर्विण्णश्च निनायेति तदीयैर्लघुकाव्यैः प्रतीयते। अन्ततश्चायं ताम्रपर्णीतटे 'पालामड़ई' इति ग्रामे

१. नीलकण्ठस्य जीवनकाल-तिथ्यादि-निर्णयविषये विशेष विवरणार्थं डॉ० सीताराम दांतरे इत्यस्य "Dete and Genealogy of Nī lakantha" इति लेखो द्रष्टव्यः [आधुनिक-संस्कृत-साहित्यानुशीलनम् : सं० डॉ० रामजी उपाध्यायः, सागरम्, सं० २०२२, पृ० १५:-२४ आङ्ग्लभाषाखण्डे]

२. तत्रैव पृ० २१-२२। समरपुङ्गवदीक्षितेन यात्राप्रबन्धचम्पूलिखितेति ज्ञायते। —गङ्गावतरणे, भूमिकायाम्, पृ० २।

संन्यासाश्रमं पालयन् दिवङ्गतः। तद्ग्राममन्दिरेऽद्याप्यस्य स्मारकः (समाधिः) राजते।

नीलकण्ठस्य ज्येष्ठाः समकालिकाश्च कवयः

तस्मिन् काले दक्षिणभारतेषु सुरभारती अभूतपूर्वं समुल्ललास। यथा तदानीं वेदान्त—मीमांसादि शास्त्रधुरीणा असंख्याः संख्यावन्तः सञ्जातास्तथैव नैके कवयोऽपि काव्यानि कलयन्ति स्म। नीलकण्ठस्याग्रजेषु कविषु—

(१) रुक्मिणीपरिणयप्रभृति निर्माता सरसकविताराज्यसार्वभौम इति प्रथितो मनस्वी श्रीमानप्पयदीक्षितः, नीलकण्ठस्यैव पितुः पितृव्यः,

(२) शितिकण्ठविजयकाव्य — भावनापुरुषोत्तमनाटक-मणिदर्पणसमय-सर्वस्व-रत्नप्रदीप-प्रभृत्यनेकप्रबन्धप्रणेता श्रीमान् रत्नखेटदीक्षितः,

(३) गङ्गालहरी-प्रभृतिकर्ता आलङ्कारिकमूर्धन्यो महाकविः पण्डितराजजगन्नाथः,

(४) त्रिपुरविजयचम्पूकर्ता नृसिंहरायमखी,

(५) स्त्रीधर्मादिविविधग्रन्थकर्ता त्र्यम्बकरायमखी,

(६) मुकुन्दविलास-राघवाभ्युदयनाटकादीनां प्रणेता श्रीभगवन्तरायः,

(७) रघुनाथविलासनाटककारो यज्ञनारायणदीक्षितः,

(८) कौमारिलदर्शनव्याख्याकारः रघुनाथभूपतिना सादरमर्धासनदानपुरस्सरमभ्यर्थितो विद्याविश्रुतः, श्रीगोविन्ददीक्षितः,[1]

(९) डिण्डिमकुलमण्डनः श्रीसोमनाथः,

(१०) पारिजातनाटकप्रबन्धा रघुनाथभूपालाश्रितः श्रीकुमारताताचार्यश्चेत्यादयोऽभूवन्। तथैवास्य समकालिककविषु—

(१) श्रीरामचन्द्रोदयमहाकाव्यस्य कर्ता श्रीवेङ्कटेश्वरः,

(२) नीलकण्ठस्यैवानुजन्मा कुशकुमुद्वतीनाटकस्य रचयिता प्रतिरघुवंशादिकर्ता अतिरात्रयज्वा,

(३) रुक्मिणीपरिणयादिमहाकाव्यनाटककर्ता श्रीराजचूडामणि-दीक्षितः

---

१. श्रूयते हरिवंशसारचरितं नाम त्रयोविंशतिसर्गात्मकं महाकाव्यं गोविन्ददीक्षितकृतम्, यट्टीका स्वयमप्पयदीक्षितेन रचिता। — गंगाव० भू० पृ० १४

(४) रुक्मिणीपरिणय--जानकीपरिणय--गौरीपरिणय द्रौपदीपरिणयादीनां नाटकानां रचनाकारः श्रीचक्रकविः,

(५) विद्यापरिणय-जीवानन्दादिप्रणेता श्रीमानानन्दरायमखी,

तथा चैवंविधा बहव आसन्। वस्तुतस्तु नीलकण्ठस्याग्रजावरजकवीनां विवरणं स्वतन्त्रस्यैव प्रबन्धस्य विषयः स्यात्, अत्र तु तत्काल-तद्देश-वैशिष्ट्य-परिचयार्थं स्थालीपुलाकन्यायेनोदाहृतानि कानिचिन्नामानि।

नीलकण्ठस्य कृतयः

एवं च यद्यप्यासीत् साहित्यसमुन्मेषेणोर्वरः खलु नीलकण्ठदीक्षितस्य कालस्तथाप्यस्य काव्यनिर्माणसमुल्लासयोः स्वातन्त्र्यरूपिणी नवरसरुचिरां रचनां प्रकुर्वाणा सर्वंकषा अस्य कविप्रतिभैव हेतुरासीन्न इतरकवीनां विदुषां वा प्रभावः। अप्रतिमपण्डितानां सुकवीनां श्रीमदप्पयदीक्षितानामेकादशपुत्रेषु न बभूव एतादृशः प्रतिभाशाली रम्यनिर्माणशाली कोऽपि। अतो नीलकण्ठ-मेवाप्पयस्य पाण्डित्यदायः साकल्येनाश्रितवान्। दिवङ्गतेऽप्पयदीक्षिते श्रीकण्ठ-मतप्रतिपादने शास्त्रविमर्शे च श्रीनीलकण्ठ एव प्रमाणं मन्यते स्म। स्वकाले समुपस्थितेषु तेषु तेषु शास्त्रविवादेषु अप्पय एव यथा निर्णयप्रदानाय प्रार्थ्यते स्म, तथैव तदनन्तरं नीलकण्ठ एव तस्य गौरवमयीं तां परम्परामुवाह। यौवने एवायं गणेशप्रतिमास्थापनविषय उपस्थिते शैव-वैष्णवयोर्विवादे निर्णयार्थं प्रार्थितः।[1] अयं हि निर्लोड्य सर्वशास्त्राणि पाण्डित्येन महतीं प्रथां प्राप्तवान्। महाकवित्वेन तु नास्ति अप्पयदीक्षितान्वयेऽस्य तुलामधिरोढुं समर्थः कोऽपि। अस्य प्रतिभा विविधविधा विषयीकुर्वाणा समुल्ललास। तस्या विपुलनिर्माण-क्षमत्वं काव्यार्थविरामराहित्यं च नीलकण्ठस्य प्रबन्धानां वैविध्येन ज्ञायते। तथाहि—त्रीणि महाकाव्यानि, एकं नाटकम्, एकां चम्पूं, प्रायशः त्रयोदश लघुकाव्यानि सुबहूंश्च दर्शन-व्याकरण-काव्यप्रबन्धानसौ जग्रन्थ। साकल्येन तेषां परिचयोऽत्र प्रस्तूयते।

गङ्गावतरणमहाकाव्यम्

गंगावतरणेऽष्टसर्गा विलसन्ति।[2] भगीरथस्य तपसा गङ्गाया भुवि अवतरणं वस्तु। कथानके नूतनगरिम्ण आधानेन निर्दुष्टकल्पनासौष्ठवेन गङ्गावतरणवर्णने कविना स्वजीवनदर्शनस्यावतारेण काव्यमिदं संस्कृत-महाकाव्येषु अभिनवपदं न्यस्य राजते। समग्रमपि महाकाव्यस्य कथानकं

---

१. Date and Genealogy of Nilakantha, p. 17

२. काव्यमाला—७६, पं० केदारनाथशर्मणा सम्पादितम्, खि० १९१६

कविना साभिप्रायैरभिनवप्रसङ्गैरुद्भासितम्। कथाया उपक्रम एव गङ्गायाः कुटिलकन्यकात्वेन परिचयश्चमत्कारं कमपि तनुते—

कन्यकास्ति कुटिलेति हिमाद्रेर्ज्यायसी स्मरणतोऽप्यघहन्त्री
शंकराय वितरीतुममर्त्याः सत्यलोकमनयन्त शिशुं ताम्।

आकलय्य विबुधोपहृतां तामष्टमिश्च नयनैर्द्रुहिणः प्राक्
नार्हतीश्वरमियं तु वराकी मुच्यतामिति गिरा निरतक्षत्॥

उद्यतां किमपि वक्तुमथैना गर्वितां कमलभूरुपलभ्य।
शापमित्थमसृजज्जलरूपा सद्य एव भवती भवितेति॥

सा ततो गिरिसुताकलयन्ती तं च निग्रहमनुग्रहमेव।
ऊर्मिभिः प्रलयसागरघोरैरुत्पपात कवलीकरणाय॥

अप्रतर्कितविधेयमपोढस्थैर्यमर्धविरतश्रुतिपाठम्।
शुष्कतालुवदनं च तदानीं पद्मभूरपि परिभ्रमति स्म॥

सावलेपनिपतत्सुरसिन्धुस्वैरचंक्रमतिरस्करणाय।
सर्वतः स निगमान् किल सेतूनाबबन्ध चतुरश्चतुरोऽपि॥

—२।६-१४

नीलकण्ठेनात्र नितान्तं तल्लीनतया निरूपितं भगीरथतपोवर्णनं कालिदास-भारविकृतपार्वत्यर्जुनयोः कठिनतपश्चर्यायाः स्मारयति। अनन्तरं गङ्गायाः सुदृढोऽवलेपो भगीरथं प्रति तस्या गर्वोक्तिषु नर्ममर्मवेदिना सुकविनेत्थं चित्रीकृतः—

प्रविष्टमात्रास्वपि मे रसातलं प्रवाहनासीरतरङ्गपंक्तिषु।
पतेदलाबूफलकर्परोपमं विभिद्य विध्यण्डकपालसम्पुटः॥

मदम्बुसम्पात विधूतकल्मषैर्महीश पूर्वैस्तव यत्र वत्स्यते।
स एव लोको यदि मत्पयोजवात्पथि प्रलीयेत फलेत् तपस्तव॥

पतत्यदारे पयसां भरे मम प्रसह्य राजन् गिरिराजमौलिषु।
समुत्पतच्छीकरवर्षदुर्दिनं चतुर्मुखो धाम किमावसेन्निजम्॥

अचिन्तयित्वा कृतिगौरवं विधेरपि त्यजन्ती करुणां शरीरिषु।
पताम्यहं यद्यपि कुत्र वा भवन् भवान्निवापाञ्जलिमाचरिष्यति॥

पतेयमप्यर्थितसाधनाय ते निगृह्य वेगं निखिलं बलादहम्।
परिप्लवाः क्षुद्रतया मदूर्मयः परन्तु नेमे वचसि स्थिता मम॥

विषादमभ्येमि भुवं पदे पदे विपद्यमानामनुचिन्त्य यद्यपि।
तथापि नन्दामि चिरोपसम्भृतां तरङ्गकण्डूमपनेष्यता त्वया॥—२।२-१०

अन्ततश्च भगीरथस्य कठोराराधनेन प्रसन्ने गङ्गां धर्तुं सन्नद्धे भगवति गंङ्गाधरे इयं गङ्गा भूलोकावतरणात् प्राक् तमप्यतितरामुपहसन्ती निजगाद—

सावलेपनिपतन्मदूर्मितासम्प्लवैककवलीकृतो हरः ।
सङ्गतः पयसि शङ्खशुक्तिभिर्नन्दिना ननु गवेषयिष्यते ॥ —५।७

तथा च देवानपि सन्तर्ज्य सा वभाषे—

यात यूयमपयात च क्षणं देवता निजनिजालयांस्ततः ।
कौतुकं तु यदि वोऽस्ति वीक्षितुं कोणमावसत निर्भया दिशाम् ॥ ५।१२

निखिलगर्वसम्भृतेयं भागीरथी एतादृशमतिदारुणमवलेपं दर्शयन्ती अपि भगवतो हरस्य जटासु भरिता कां दशां प्रपेद इति वर्णयन् कविस्तस्या अहङ्कारस्य कामपि परिणतिमतीव रोचकतया निदर्शयति—

अप्रतर्क्यमसमीक्षितावधि तं कपर्दवलयं पिनाकिनः
आपगा दिविषदामवाङ्मुखी पन्नगीव कलशं समाविशत् ॥ (५।५७)

भगीरथस्य प्रार्थनया जटाकारागारात् तां मुक्तवति भगवति—

तान्येव यादांसि महाद्भुतानि ता एव पर्याप्तदिशो लहर्यः ।
पेतुः कपर्दात् पुनरिन्दुमौलेर्गर्वोक्तयस्ताः वव गता न विद्मः ॥ ६।२२

काव्येऽस्मिन् भगीरथ-रथमनुयान्त्या भागीरथ्या वाराणसी-प्रभृति नगरीषु चङ्क्रमणं सरयूप्रभृतिनदीभिश्चास्या सङ्गमश्चातीव हृदयावर्जकं चित्रितः । निर्वहणे काव्यनायको भगीरथः समग्रसम्पत्तिसहितं फलयोगं प्राप्य मुमोद—

सम्भाव्य देवः क्रमशो द्विजातीन् बन्धूनमात्याननुजीविनश्च ।
द्वारान्तिकस्तब्धवधूसमाजसम्बाधमन्तःपुरमाविवेश ॥

वियोगखिन्नास्तपसा विषण्णं स्वानेक्षिताः स्वप्नदशानुभूतम् ।
स्मेराननाः स्मेरमुखारविन्दं तमभ्युपेयुस्तरुणं तरुण्यः ॥

पादे निपेतुः परिरभ्य दीर्घं तस्थुर्मुखैस्तस्य मुखं चुचुम्बुः ।
सङ्कल्पयोगाच्चिरविप्रलब्धास्तथापि तं नैव विशश्वसुस्ताः ॥

संरक्षन्ननुजीविनो वितरणैः सम्प्रीणयन्नर्थिनः
पौराञ्जानपदानपि प्रतिदिनं पश्यन् दयादृष्टिभिः ।
आ वेधोगृहमारसातलमपि स्वं नाम विश्रावयन् ।
दीनत्राणकृता भुजेन बुभुजे देवः समस्तां भुवम् ॥ —८।८८-९१

वस्तु-नेतृ-रसादीनां समुचितसंयोजनेन, भावानामद्भुतसम्भारेण, कमनीयकल्पनाभिस्तथा च क्रान्तदर्शिजीवनदृष्ट्या काव्यमिदमतितरामुत्कृष्यते।

शिवलीलार्णव-महाकाव्यम्

शिवलीलार्णवे द्वाविंशति सर्गाः सन्ति।[1] भगवतो भूतभावनस्य विविधलीलानां भूरिभक्तिभावनया विहितं वर्णनमस्यौदात्त्यं समेधयति। अत्र वर्ण्यविषयस्य रघुवंशवदतिविपुलः सम्भारः कविना समुपस्थापितः। तत्र राज्ञः कुलशेखरस्य यज्ञे वेदिकामध्याद् वेदिविलग्नमध्यायाः कुमारिकाया उत्थानम्, तस्या दिग्विजय इत्याद्या घटना अद्भुतरसं परियोषयन्ति।

स्थाने स्थाने निसर्ग-पर्यवेक्षणं कवेः सूक्ष्मदृशं पिशुनयन् रसपेशलतां पुष्णाति। नवमसर्गे प्रभातवर्णनं मनोहारि घटितम्। तत्रैव कान्तार-पर्वतादीनामपि स्वाभाविकी छविः कविना अङ्किता। मनुष्याणां चरित्रानुशीलने किमपि पाटवं प्रकटीचकार कविः। नवमसर्गे कोल-किरातादीनां चेष्टा संलापाश्च स्वभावोक्तिरम्या राजन्ते। द्वादशसर्गे नववध्वाश्चेष्टादिकमतिसूक्ष्मनिरीक्षणपूर्वकं प्रकटीकृतम्। अस्मिन् महाकाव्ये वात्सल्यभावनायाः परिपोषं सविशेषं कविर्विदधाति। शिशुं वीक्ष्य पित्रोर्मनसि उद्गच्छन्तो भावानां ते ते उच्छ्वासा अन्तस्तलमर्मावगाहं कृत्वा कविना विशदं वर्णिताः। अत्र षष्ठ-सप्तमाष्टमादिसर्गेषु विशिष्य वात्सल्यविजृम्भितं विलोक्यते। तथाहि—

आलिङ्ग्य सकृदनुक्षणं स्पृशन्ती चुम्बन्ती मुखकमलं मुहुर्मुहुश्च।
पश्यन्ती विकसितपक्ष्मभिः कटाक्षैस्तां बालामलभत निर्वृतिं न माता॥
आनन्दव्रुटितविशीर्णकञ्चुकान्ताद् वक्षोजादथ मलयध्वजप्रियायाः।
अन्तःस्यन्दत मधुरं पयः प्रभूतं बिभ्रत्यास्त्रिभुवनमातरं कुमारीम्॥
प्रेयस्याः सविधमुपेत्य दीयमानामुत्प्लुत्य स्वयमुपगूहितुं पतन्तीम्।
कन्यां तामभृतमयीनिवाददानः कैवल्यं धरणिपतिस्तृणाय मेने॥
(६।७७-७९)

समजनि सुखिता कुमारिका सा सकुडुपधाय मुखं स्तने जनन्याः।
वदनसरसिजं दृशा पिबन्ती न तु दुहितुर्जननी जगाम तृप्तिम्॥ ७।३

दिग्विजयार्थं प्रयातां तामेतां मलयध्वजराजपुत्रीं स्वग्रामं प्राप्तां दृष्ट्वा ग्रामवधूनां कुटिलतानभिज्ञानि आर्जवसंस्पृष्टानि कथनानि कामपि छटां किरन्ति—

---

१. श्रीरङ्गस्थवाणीविलासमुद्रणालयतः प्रकाशितम्, १९१२

सन्ति नः शतमजा दश गावः पञ्चषाणि महिषा दयया ते
गव्यमेतदुपभुङ्क्ष्व कदुष्णं दूरमम्बु तृषितासि पथि त्वम् ॥
अस्ति पर्युषितमस्ति यवागूः सन्ति वंशशकलाद्युपदंशाः ।
शीतमुष्णमपि वा पिब कामं गच्छ पुत्रि न पुनः क्षुधिता त्वम् ॥
(—८।४६, ४७)

नलचरित्रनाटकम्

नलचरित्रमिति नाटकं दमयन्तीनलयोर्विचित्रस्य चरित्रस्य चमत्कारमय-नूतनसंविधानसवलितं चित्रणं प्रस्तुतीकुरुते।[1] कालिदासभवभूत्योरत्र प्रभावः पदे पदे प्रत्यक्षीक्रियते, तथापि नाट्यकारस्तं मौलिकतया मण्डयति। मुकुन्दविलास-वदिदमपि नाटकमपूर्णमेव। असमग्रे षष्ठाङ्के दमयन्तीनलयोर्विवाहमनु प्रवर्ति-तेषु तयोर्दाम्पत्यविलासेषु तेषां हानयेऽभिसन्धिं रचितवति ईर्ष्याग्रस्ते देवे इन्द्रे कथा विच्छिद्यते। अत्रत्या वस्तुसंघटना मृच्छकटिकमुद्राराक्षसयोः सुसम्बद्ध-ताया अनुकुरुते। इन्द्रस्य चरित्रमत्र नाटकीयद्वन्द्वघटनाये कालीकृत्य प्रस्तुतम्। नलेन दमयन्तीं स्वप्ने विलोक्य कल्पनया तच्चित्रनिर्माणम्, गर्भाङ्कसंयोजनम्, उत्तररामचरितवत् अदृश्यनले न मुमूर्षमाणायादमयन्त्याः पुनरुज्जीवनम्— एवमेवान्ये बहवः प्रसङ्गास्य प्रबन्धस्य प्रभविष्णुतां संवर्धयन्ति। भाषा सरणि-श्चात्रगते कालिदासस्यसकृत् स्मारयतः। कथानके नूतना उद्भावना अपि नाटकमिदं नवयोगं विदधति। यथा—नलस्य स्वप्नवृत्तान्तः, सरस्वत्या स्वहंसेन पत्रप्रेषणम्, नारदबृहस्पत्योः नलस्य इन्द्रस्य च पक्षेणाचरणम्, सावित्री-सरस्वतीभ्यां नायकयोः संयोगघटनाय प्रयासश्चेति। संवादेषु यद्यपि कविना वार्तालापप्रयोगार्हा अक्लिष्टैव भाषा सर्वत्र प्रायोजि, तथापि निसर्गरामणीयकं वर्णयन्नसौ भवभूतेः पदावलीमपि प्रयुङ्क्ते, तथाहि—

स्वच्छन्दप्रचरन्मदान्धमहिषव्याधूतभृङ्गाहति—
क्षुभ्यत्पङ्ककलङ्कपल्वलपयोलुण्ठाकचण्डातपाः ।
दृश्यन्ते परिपाकपाण्डरदलद्व्याकीर्णजीर्णाटवी—
रिङ्खद्दावशिखाचटच्चटरवोन्मिश्रा गिरिश्रेणयः ॥ १।४७

सन्दृश्यन्ते करीषङ्कषपवनसमुद्धूतमाण्डीरशाखा—
डोलारूढालवङ्गप्रवरकिलकिलारावमेदस्विकुञ्जाः ।
क्षोणीभृत्कन्दरोद्यद्घनमहिषविषाणाग्रघोराभिघात—
त्रुट्यद्वल्मीकधूल्या चुलुकितसरितो विन्ध्यकान्तारेखाः ।

---

१. बालमनोरमामुद्रणालयात् १९२५ वर्षे प्रकाशितम्।

अभ्यर्णभ्रमदध्वनीनपरिषन्निद्यानपर्याकुल—
क्रोशत्पक्कणवाटकुक्कुरघटाबुक्कारबोद्गारिणः ।
लङ्घन्ते कतिचित् क्वचित् क्वचिदपि प्रक्रान्तचक्रानिल—
प्रेङ्खत्पाटलपांसुमांसलदिशोभोगा विभागा भुवः ।। २।२७, २८

एवमस्मिन् नलचरित्रनाटके प्रकटितातिसूक्ष्मपर्यवेक्षणानि, रससृष्टि-संवलितानि, आस्वादवृष्टिकरणानि सौन्दर्यदृष्टिसूचनानि वर्णनान्यनेकत्र राजन्ते—

तरुणपवनाघातव्याधूतनूननतकेतक-
स्तवकविगलन्माध्वीसम्पातशीतलिताम्भसाम् ।
उपरि सरसामस्मिन्नुत्तनितानतपङ्क्तय-
स्तरललहरीडोलारूढास्तरन्ति शकुन्तयः ।। १।३८

तथैव प्रभातवर्णने तपोवनदृश्यम्—

संगृह्णन्ति हिमच्युतः परिमितानिन्दोश्चकोराः करान्
आसीदन्ति शनैः शनैरभिमुखापाङ्गा रथाङ्गाह्वयाः ।
सत्रासप्रतिबुद्ध तापसवटुप्रारब्धनिद्रास्खलद्-
वर्णग्रामकसाम्गीतिमुखरक्रोडास्सनोडाश्रमाः ।। २।२

नीलकण्ठविजयचम्पूः

नीलकण्ठविजयचम्प्वां कविर्नीलकण्ठः शिवलीलार्णवमहाकाव्य इव भगवतो नीलकण्ठस्य भक्तिभावसम्भृतं लीलागानं प्रस्तौति।[1] गद्यपद्यबन्धयोः समं पाटवमनेनात्र प्रकटितम्। देव-दानयोस्तुमुलः संग्रामः, अमृतमन्थनम्, हालाहलस्य प्राकट्यम् अन्ये चैतादृशाः प्रसङ्गाः कविना समुत्तेजनसमर्थया वेगवत्या भारत्या विशद्य वर्णिताः। गद्यबन्धेषु दीर्घैः सस्मतपदबहुलैरपि वाक्यैः कथाया गतिर्न व्याहन्यते, अपितु क्वचित्तादृशाः समासबन्धा एव तां झटित्यग्रेसरां विदधति। अत्र क्वचिन्नर्मगर्भाः परिहासाः (यथा यज्ञहविरपहरत्सु दानवेषु देवानां कष्टापन्नत्व-वर्णने—पृ० ४५-४६), क्वचिद् भैरवनिःस्वनाः (यथा कालकूटप्रादुर्भावे पृ० १२६-१२८ तुरीयाश्वासे) क्वचिच्च माधुर्योपेता आलापाः प्रत्यक्षमिव श्रूयन्ते। ध्वन्यात्मभूतेऽस्मिन् काव्ये यमकादीनां निवेशनं कविना परिहृतप्रायमेव। सर्वत्र सौष्ठवार्जवसम्पन्नभाषा-व्यवहारशाली असौ शोभते। क्वचिच्च प्रयुक्तमपि यमकादिकमप्रमादित्वमेव कवेः प्रकटयति, यथा शिवस्य सरलतया गरलपाने—

---

१. चौखम्भासीरीजेप्रकाशितम् १८६४।

'माधव इव नवनीतमुमाधवो गरलमुपयुयुजे ।—(पृ० १४४)

क्वचिदुपमादीनां समुचितो विन्यासश्चम्त्वा अस्याः सौन्दर्यं बृंहयति। यथा गरलपानमनु—

अजनि शनैर्विशदं जगदपसर्पति कालकूटसन्तससे ।
तात्पर्यमिव कवीनां तार्किककोलाहलोपरमे ॥ —४।३०

कलिविडम्बनम्

अस्मिन् लघुकाव्ये १०२-अनुष्टुप्-छन्दांसि कामपि छटां किरन्ति। विडम्बन-काव्य-विधाया इदं दुर्लभमपूर्वमेव च निदर्शनम्। नीलकण्ठेन स्वप्रखर-दृशाऽत्र विविधा समकालिकसमाजविकृतय उद्वाट्य प्रखरतरव्यङ्ग्यप्रहाराणां विषयीकृताः। अत्र वादेषु विजगीषवः, अध्यापकाः, मान्त्रिकाः, मौहूर्तिकाः, कवयः, गृहिण्यस्तथा चैवमेवान्ये बहवः तत्तत्पाखण्ड-जाड्य-छद्मादिनिदर्शन-पुरस्सरं निपुणमुपालब्धाः। अत्र नीलकण्ठस्य देश-कालावबोधः समाजस्य कृते जागरूकता च विज्ञायते। स्थालीपुलाकन्यायेनोद्धियन्ते कानिचित् स्थलानि—

अभ्यास्यं लज्जमानेन तत्त्वं जिज्ञासुना चिरम् ।
जिगीषुणा ह्रियं त्यक्त्वा कार्यः कोलाहलो महान् ॥ ५

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति ।
इति पाठयतां ग्रन्थे काठिन्यं कुत्र वर्तते ॥ ६

यदि न क्वापि विद्यायां सर्वथा क्रमते मतिः ।
मान्त्रिकास्तु भविष्यामो योगिनो यतयोऽपि वा ॥ १०

पुत्र इत्येव पितरि कन्यकेत्येव मातरि ।
गर्भप्रश्नेषु कथयन् दैवज्ञो विजयी भवेत् ॥ १५

आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्जनैः ।
जीवन्तो बहु मन्यन्ते मृताः प्रक्ष्यन्ति कं पुनः ॥ १६

न कारणमपेक्षन्ते कवयः स्तोतुमुद्यताः ।
किञ्चिदस्तुवतां तेषां जिह्वा फुरफुरायते ॥ ३४

गृहिणी भगिनी तस्याः श्वसुरो श्याल इत्यपि ।
प्राणिनां कलिना सृष्टाः पञ्च प्राणा इमेऽपरे ॥ ४१

जामातरो भागिनेया मातुला दारबान्धवाः ।
अज्ञाता एव ग्रहिणां भक्षयन्त्याखुवद् गृहे ॥ ४२

गृहिणी स्वजनं वक्ति शुष्काहारं मिताशनम्।
पतिपक्ष्यांस्तु बहूवाशान् क्षीरपांस्तस्करानपि ॥ ४७

कौपीनं भसितालेपो दर्भा रुद्राक्षमालिका।
मौनमेकासिका चेति मूर्खसञ्जीवनानि षट् ॥ ८६

सदा जपपटो हस्ते मध्ये मध्येऽक्षिनिमीलनम्।
सर्वं ब्रह्मेसि वादश्च सद्यः प्रत्ययहेतवः ॥ ८०

सभारञ्जनशतकम्

यथा कलिविडम्बने कविना उपालम्भ-विडम्बनसंवलिताः पाखण्ड-मान्द्य-छद्मादिदुर्गुणेषु कठोरं व्यङ्ग्यप्रहाराः कृतास्तथैवात्र सभारञ्जनक्षमाणां सभ्यजनोचितानां सद्गुणानां विकासो येन स्यात् स पन्थाः साधु निर्दिष्टः। कवेर्जीवनादर्शाः काव्यदाम्पत्यादिविषये विचाराश्च सर्वथा परिष्कृता उदात्ताश्च। तथाहि—

अशिक्षितानां काव्येषु शास्त्राभ्यासो निरर्थकः।
किमस्त्यनुपनीतस्य वाजपेयादिभिर्मखैः ॥ १७

अन्धा विद्वज्जनैर्हीना मूका कविभिरुज्झिता।
बधिरा गायकैर्हीना सभा भवति भूभृताम् ॥ १८

नामरूपात्मकं विश्वं दृश्यते यदिदं द्विधा।
तत्राद्यस्य कविर्वेधा द्वितीयस्य चतुर्मुखः ॥ २६

सर्वत्र लाल्यन्ते शूरो भीरुः सर्वत्र हन्यते।
पच्यन्ते केवला मेषाः पूज्यन्ते युद्धदुर्मदाः ॥ ३८

भार्यायाः सुन्दरः स्निग्धो वेश्यायाः सुन्दरो धनी।
श्रीदेव्याः सुन्दरः शूरो भारत्याः सुन्दरः सुधीः ॥ ४८

गृहिणा यदि लभ्येत गृहिणी हृदयंगमा।
संसार इति को भारस्तं सारमनुपश्यतः ॥ ८२

आहृत्य चिनुमः स्वर्गमपवर्गमपि क्रमात्।
अनुकूले हि दाम्पत्ये प्रतिकूले न किञ्चन ॥ ८२

शान्तिविलासः

अत्र ५१ पद्येषु जीवनस्य तुरीयभाग उद्बुद्धा निर्वेद-ग्लानि-पश्चात्ताप-गुप्सापेक्षा-प्रभृतयो भावा मर्मस्पृशं महाकविना प्रकटिताः। जगति निरन्तरं

विषयप्रपञ्चप्रसक्त्या अनुधावनैः श्रान्तोऽनुशयपरिखिन्नः कविर्निर्विण्णोऽत्र मनोव्यथां मनोन्माथिनीमभिव्यानक् ।

तथाहि—

यामाराद्धुं न गणितमिदं जीवितं वा धनं वा
यस्याः प्रीतिर्मनसि कलिता ज्यायसी मोक्षतोऽपि ।
सेवैदानीं मनसि चलिते सम्प्रहीणे च वित्ते
तूलायापि त्रिपुरहर मां मन्यते नैव भार्या ॥ ३

कृत्वा पापान्यपि खलु मया पोषिताः शैशवे ये
निद्राहारावपि विजहता शिक्षिता ये कलासु ।
प्रादुर्भूताः स्वयमिह हि ते प्राक्तनादृष्टलब्ध—
प्रज्ञोन्मेषा इव च तनया न स्मरन्त्यात्मनोऽपि ॥ ४

राज्ञो भृत्या यदि परिचिता देशिकस्यैष लाभो
राजद्वारे यदि खलु गतं नैमिशे तत्प्रविष्टम् ।
राजा दृष्टोऽथ यदि परं ब्रह्म साक्षात्कृतं तत्
त्यक्तो देहो यदि नृपकुले मादृशां सोऽपवर्गः ॥ ६

शान्तो वह्निर्जठरपिटरे संस्थिता कामवार्ता
धावं धावं दिशि दिशि शनैरिन्द्रियाश्वा निपेतुः ।
एवं दैवादुपरममगादेष मे वैरिवर्ग—
श्चेतस्त्वेकं न वशमयते किं करोमि क्व यामि ॥ १२

यामे यामे गलति वपुषः स्रंसते सन्धिबन्धः
श्वासे श्वासेऽपि च विचलति क्षीयते दीर्घमायुः ।
भुक्ते भुक्तेऽपि च सुखलवे लुप्यते पुण्यराशिः
कृत्ये कृत्ये निरवधि पुनर्वर्धते पातकं नः ॥ १६

आयान्त्यग्रे ननु तनुभवा उत्तमर्णा इवेमे
शय्यालग्नाः फणभृत इवाभान्ति दारा इदानीम् ।
कारागेहप्रतिममधुना मन्दिरं दृश्यते मे
तत्र स्थातुं प्रसजति मनो न क्षणं न क्षणार्धम् ॥ २१

वैराग्यशतकम्

वैराग्यशतके कविः पूर्वकाव्ये प्रकटितानां द्वन्द्वात्मकभावानामुपरि उत्थाय सुदृढं वैराग्यमालम्बते । तद्यथा—

पततु नभः स्फुटतु मही चलन्तु गिरयो मिलन्तु वारिधयः ।
अधरोत्तरमस्तु जगत् का हानिर्वीतरागस्य ॥ ३

तृणवद् भ्रमन्ति चपलाः स्त्रीनामनि चण्डमारुते चलिते ।
धरणीधरा इव सन्तस्तत्र न किञ्चित्प्रक्रम्पन्ते ॥ १५

कविनात्र क्वचिद् गम्भीरप्रसङ्गानां विषये मार्मिका अभिप्रायाः प्रकटिताः क्वचिच्च जागतिकप्रपञ्चप्रसक्तानां जनानां च जीवनस्य निरर्थकता सोल्लुण्ठं निर्दर्शिता । तथाहि—

पितृभिः कलहायन्ते पुत्रानध्यापयन्ति पितृभक्तिम् ।
परदारानुपयन्तः पठन्ति शास्त्राणि दारेषु ॥ २४

कलहायन्ते मूढाः कः प्रतिभूः श्वः प्रभात इति ।
तस्यामेव रजन्यां कः प्रतिभूः स्वस्य सत्तायाम् ॥ ३१

वन्ध्येत्याहुस्तरुणीं जरतीति परित्यजन्ति बहुपुत्राम् ।
अपि निन्दन्त्यल्पसुतां का कामिनी कामिनां हृद्या ॥ ४८

यान्ति शुचमकृतदारा द्वे भार्ये नेति कृतदाराः ।
ते परदारा नेति स्त्रीभिस्तृप्तान्न पश्यामः ॥ ४९

त्यक्तव्यो ममकारस्त्यक्तुं यदि शक्यते नासौ ।
कर्तव्यो ममकारः किं तु स सर्वत्र कर्तव्यः ॥ ७७

आनन्दसागरस्तवः

आनन्दसागरस्तवे कविना १०८-पद्येषु आनन्दसागरतरङ्गपरम्परायां मज्जता भावगद्गदं भगवत्या अम्बिकायाः स्नेहार्द्रो वात्सल्यकातरः संस्तवो विहितः । कवेर्भक्तिभावाकुलता च न न भावयतश्चेतः । तथाहि—

आवेद्यतामविदितं किमथाप्यनुक्तं
वक्तव्यमान्तररुजोपशमाय नालम् ।
इत्यर्थ्यसे किमपि तच्छ्रवणे निधातुं
मातः प्रसीद मलयध्वजपाण्डयकन्ये ॥ २

पर्याकुले मनसि वाचि परिस्खलन्त्या–
मावर्तगर्त इव चक्षुषि घूर्णमाने ।
कस्तेऽभिधास्यति शिवे मम तामवस्थां
काले दयस्व कथयामि तवाधुनैव ॥ ४

आक्रान्तमन्तररिमिर्मदमत्सरार्द्यं—
गात्रं वलीपलितरोगशतानुविद्धम् ।
दारैः सुतैश्च गृहमावृतमुत्तमर्णै—
र्मातः कथं भवतु मे मनसः प्रसादः ॥ २८

एवं गतस्य मम साम्प्रतमेतदर्हं—
मत्रेदमौपयिकमित्थमिदं च साध्यम् ।
अस्मिन् प्रमाणमिदमित्यपि बोद्धुमम्ब
शक्तिर्न मे भुवनसाक्षिणि किं करोमि ॥ ३१

त्वय्यर्पितं प्रथममप्ययज्वनैव
स्वात्मार्पणं विदधता स्वकुलं समस्तम् ।
का त्वं महेशि कुलदासमुपेक्षितुं मां
को वाऽनुपासितुमहं कुलदेवतां त्वाम् ॥ ३६

एतज्जडाजडविवेचनमेतदेव
क्षित्यादितत्त्वपरिशोधनकौशलं च ।
ज्ञानं च शैवमिदमागमकोटिलभ्यं
मातुर्यदङ्घ्रियुगले निहितो मयात्मा ॥ ४८

पाषाणतोऽपि कठिने शिरसि श्रुतीनां
प्रायः परिश्रमवशादिव पाटलाभम् ।
अम्ब स्मरेयममृताणंवमान्थलब्ध-
हैयङ्गवीनसुकुमारमिदं पदं ते ॥ ५४

ब्रह्मेशकेशवमुखैर्बहुभिः कुमारैः
पर्यायतः परिगृहीतविमुक्तदेशम् ।
उत्सङ्गमम्ब तव दास्यसि मे कदा त्वं
मातृप्रियं किल जडं सुतमामनन्ति ॥ ६७

नष्टोपलब्धमधिगत्य शिशुं चिरान्मां
वात्सल्यविद्रुतहृदः परदेवतायाः ।
क्लिद्यत्पयोधरविनिःसृतदुग्धबिन्दु-
निष्यन्दपङ्क्तिरिव दीप्यति हारयष्टिः ॥ ७२

अन्यापदेशशतकम्

अन्यापदेशशतकेऽन्योक्तयः संकलिताः सन्ति । तासु काश्चन भावसुभगत्वमभिप्रायनूतनत्वं च व्यञ्जन्ति । यथा—उरगोक्तौ—

उन्मुच्य स्वजनानुपेक्ष्य तृणवत्प्राणानपि प्रेयस-
स्तीर्त्वा दुस्तरमर्णवं च वणिजः प्राप्ताः पटीराशया ।
श्वासैस्ते विनिवर्तिताः प्रतिभयैः स्वस्थो भवातः परं
त्वं वा केवलमङ्गमङ्गमुरग व्यालिम्प गन्धद्रवैः ॥ २

वणिग्विषये च—

आसीनः सुखमापणे यदि वणिक् श्रद्धालुभिः प्रार्थितः
किंचिच्छंसति पञ्चकं दशकमित्येतन्न तस्याद्भुतम् ।
आपातालविघूर्णिताम्भसि चलत्यौत्पातिके मारुते
मज्जन्त्यामपि नावि मुञ्चति न यस्तामेव मूल्यस्थितिम् ॥ १५

निम्बोक्तौ च—

चूताः पल्लवमुद्गिरन्ति वितरन्त्येतत्पिकेभ्यस्तत-
स्तेऽप्येतेन कुहूः कुहूरिति कलं कुर्वन्ति कूजामिति ।
निम्बोऽपि स्वयमुद्गिरन् फलमनेनाराधयन् वायसान्
किञ्चित् तेषु ततो रटत्सु सफलं जन्म स्वकं मन्यते ॥

शिवोत्कर्षमञ्जरी[1]

शिवमाहात्म्यवर्णनपरेऽस्मिन् काव्ये नास्ति आनन्दसागरस्तव इव भावतल्लीनता तन्मयीकरणक्षमता च । कवेः शिवभक्तिः शैवसिद्धान्तेऽभिनिवेशश्चात्र स्फुट एव—

क्रत्वात्मा पुरुषः क्रतुः क्रतुभुजो वक्ता क्रतूनां क्रतो-
राधारः क्रतुकालकल्पनपरो सर्वेऽप्यमी संहताः ।
यस्यातिक्रमतः सह क्रतुकृता भ्रष्टाश्च नष्टाः क्षणात्
स स्वामी मम दैवतं, तदितरो नाम्नापि नाम्नायते ॥ १३

चण्डीरहस्यम्

चण्डीरहस्ये ३६ तोटकवृत्तेषु शाक्ततत्त्वप्रतिपादनसंवलितः चण्ड्याः संस्तवः प्रस्तूयते कविना । सरणिर्मनोहारिणी भाषा चात्र सरसा विलसति—

---

१. आपञ्चमादेकादशं यावन्ति इमानि सप्त लघुकाव्यानि 'मायनर पोयम्स ऑव नीलकण्ठ दीक्षित' इति संकलने श्रीरङ्गस्थ—वाणीविलासमुद्रणालयात् १९११ तमे ई० वर्षे प्रकाशितानि ।

रामायणसारसंग्रह-रघुवीरस्तवः

रामायणसारसङ्ग्रहे ३३ पद्येषु रामायणकथासारेण सह प्रतिपद्ये रामस्य प्रशस्तिरपि सुगुम्फिता। तथाहि—

यज्ञं ररक्षिथ मुनेर्यदि कौशिकस्य
यज्ञात्मनस्तव तु तां विदुरात्मरक्षाम्।
कीर्तिं यदीच्छसि कृतार्थय मामनाथं
काकुत्स्थ वीर करुणैर्मसृणैरपाङ्गैः॥

गुरुतत्त्वमालिका[1]

गुरुतत्त्वमालिकायां नीलकण्ठेन स्वगुरोः श्रीमद्गीर्वाणेन्द्रयतेः प्रशस्तिः विहिता। गुरौ सुदृढाऽस्य भक्तिर्दृश्यते।

ध्यात्वा यं हृदि दण्डिनं विजहति स्वप्नेऽपि दण्डस्पृहां
यत्काषायपटस्मृतिः शमयते सद्यः कषायं नृणाम्।
यं साक्षाद् भवरूपमेव भजतां न क्वापि भूयो भवो
गीर्वाणेन्द्रगुरुं तमेव निभृतं ध्यायेम गायेम च॥४

उद्भूतस्मितमुत्प्रबन्धकरुणाकल्लोललोलेक्षणं
व्यश्नन्तामृतवर्षिहर्षितपराहङ्कारशंङ्कारवम्।
एकं तद्वदनाम्बुजं कुलगुरोर्भक्त्या निदिध्यासतः
पञ्चाहो परितः स्फुरन्ति युगपद् वक्त्राणि चित्राणि मे॥७

अत्रत्या यमकानुप्रासच्छटा पदानां नृत्यत्प्रायत्वं साधयति, यथा—

कृच्छ्राणि प्रदिशन् सकृच्छ्रवणतः कृच्छ्राणि हन्ति स्वतः
कर्माणि ग्रसते समूलमपि नः कर्माणि सिद्धिं नयन्।९

कैय्यट-व्याख्यानम्

ग्रन्थस्यास्योल्लेखः नीलकण्ठनाम्ना अतिरात्रयज्वकृते कुशकुमुद्वतीनाटके तत्तृतीयपुत्रगीर्वाणेन्द्रकृते शृङ्गारकोशभाणे चोपलभ्यते। व्याकरणशास्त्र-विषयकोऽयं नीलकण्ठस्य प्रबन्धः प्रतीयते।

---

१. त्रीण्यपीमानि काव्यानि पाण्डिचेरीस्थ-प्राच्यविद्यासंस्थानात् प्रकाशितानि [Oleuvres Poetiques De Nilakantha Diksita : Pierre sylvan Filliozat Institute Francais D' Indologie, Pondichery,—1967]

शिवतत्त्वरहस्यम्

शैवदर्शनविषयकोऽयं नीलकण्ठकृतो ग्रन्थः प्रतिभाति। अस्याप्युल्लेखः पूर्ववत् नीलकण्ठस्य भातृ-पुत्राभ्यां विहितः।

त्यागराजस्तवः

अस्य स्तोत्रकाव्यस्य नामोल्लेख एव लभ्यते।

चित्रमीमांसादोषधिक्कारः

कृष्णमाचार्यानुसारेण प्रकरणमिदं नीलकण्ठेनैव कृतम्।[1] केचन विद्वांसोऽस्य प्रणेतृविषये विप्रतिपद्यन्ते। डे—महाभागस्तु नीलकण्ठानुजचिन्नाप्पयकृतेयं कृतिरिति सम्भावयति[2] हुल्ट्झमहाभागश्चैनामतिरात्रयज्वकृतां मनुते।[3] तथात्वे सत्यपि नीलकण्ठस्यैव केनचित् भ्रात्राऽयं ग्रन्थो विहितः, तेन च नीलकण्ठस्यात्र साहाय्यं परामर्शश्च स्यातामेवेति सम्भाव्यते, तस्य दीक्षितान्वये स्वभ्रातृषु च बहुमतत्वात्, सुपूजितत्वाच्च। अत्र नीलकण्ठेन तदनुजेन वा पण्डितराज-विहित-चित्रमीमांसा-परिवादस्य प्रतीकारो विहितः।

कवेर्नीलकण्ठस्य काव्यदर्शनं, काव्यप्रतिभा च

काव्यक्रिया नाम नीलकण्ठस्य कृतेतपश्चर्यायाः साधनाया वा पर्यायः। अत एवासौ काव्यं कुर्वन्नहं तप एव तपामीत्याह—

'पश्यन् वाचा तपस्यामि काव्यसन्दर्भरूपया।' गं० १।५५

स्वकाले एतादृशकाव्यसन्दर्भरूपं तपो दुरूपयुञ्जानान् चाटुकारान् कुकवीन् दशं दशं दूयमानोऽसौ तान् निरभर्त्सयत्, वाल्मीकि-कालिदास-भवभूतीनां च महनीयोदात्तकाव्यादर्शान् मनस्यधारयत्—

---

१. "In his Citramimansadosadhikkara he answered the criticism of Panditaraja and justified the views of his grand uncle.' '
—Hist. of Sanskrit Literature, Krishnamachari, P. 237.

२-३. "The authorhip of this work is uncertain—Oppert 4802 ascribes it to Chinna Appaya, younger brother of Nilakantha Diksita, but Hultzsch ascribes it to Cinna Appaya's last brother Atiratrayajva."
—Hist. of Sanskirt Poetics : De, Vol. J, p. 225

कान्तः सहृदयो वाचः कविरेव चिरन्तनः ।
जडे जगति येनैवच्छन्दः प्रागन्वरुध्यत ।।

कवितामफलद्वीटी कालिदासमुखेऽर्पिता ।
पत्यर्मुखे तु सा गौर्याः परुषं निगमाक्षरम् ।।

आमये यमके जाग्रत्यपमृत्यौ च दुष्कवौ
वाणि प्राणिषि तन्मध्ये वज्रेणैवासि निर्मिता ।। गंगा० १।३,३,३६

शब्दाख्यमपरं ब्रह्म सन्दर्भेण परिष्कृतम् ।
विक्रीयते कतिपयैर्वृथाऽन्यैर्विनियुज्यते ।। कलि० – ३७

इतर-वाङ्मयप्रकारेभ्यः काव्यस्य विशेषोऽनेनेत्थमवगतः—

तान्येव शास्त्राणि त एव शब्दास्त एव चार्था गुरवस्त एव ।
इयान् विशेषः कवितापथेऽस्मिन् देव्या गिरां दक्षपरिवर्तभेदः ।।
यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः ।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति ।।

—शिवली० १।३३,१३

कविर्नीलकण्ठः काव्यसाधनया कामप्यभिव्यक्तिसिद्धिं लेभे । तपसा परिष्कृता जाज्वल्यमाना प्रखरा चास्य वैखरी विलोक्यते । एतादृश्या जीवन्त्या प्रतिभया सुसमाहितया शेमुष्या च सम्पन्नस्यास्य सुकवेर्भाषा तथैव सरणिरपि सप्राणा, वेगवती, समुच्छ्वसन्ती च समीक्ष्यते । यथा प्रासङ्गिकानांभावानां तथैव तेषां कृते समुचितपदानामपि न कदाप्यभावोऽस्य काव्यसर्जनायां भवति । तथैव चास्य कल्पनाप्यनल्पलावण्यच्छटां विकिरन्तीकाव्याङ्गणेऽनवरतं नरीनृत्यति । गङ्गावतरणे ग्रीष्मचित्रेषु—

चण्डमारुतचलन्मृदुघासग्रासलालसतया गतिमान्द्यम् ।
प्रस्तुवत्यहिमभानुतुरङ्गे द्राघिमाणमलभन्त दिनानि ।।

तापमातपतरङ्गितमुच्चैः क्षन्तुमक्षमतया दिनलक्ष्मीः ।
किं विरायति निशेति वितीर्णोद्ग्राहिकेव वपुरायतमूहे ।।

भानुभिः प्रलयपावकतीव्रैरापिबत्युदकमम्बुजबन्धौ ।
दूरदूरमपदिश्य मरीचीर्दुद्रुवुर्दिशि दिशीव सरस्यः ।।

शक्यमञ्जलिपुटैः सलिलार्द्रैः सान्द्रमातपभरं प्रविकीर्यं ।
जीर्णपर्णजटिलानि तदानीं विष्वगुज्ज्वलयितुं विपिनानि ।।

अङ्किताः किमपि शैवलखण्डैरातपाच्छकलितैरसिनीलाः ।
कोण एव सरितामवहन्त प्रान्तलीनपथिका जलवेण्यः ।। (२।३१-३७)

अत्रानुप्रासविन्यासः उपयुक्तपदप्रयोगः स्वभावोक्तिरम्याचित्रोपमवर्णनक्षमताऽर्थालङ्कारच्छटा च कवेः प्रतिभायाः समाधिं सूचयन्ति। तथैव कुटिलाया हिमाद्रेः कन्यकाया ब्रह्मलोककवलीकरणाय प्रवहितायाः शक्त्या वृद्धस्य ब्रह्मणः सम्भ्रम-चित्रणे—

अप्रतर्कितविधेयमपोढस्थैर्यमधंविरतश्रुतिपाठम् ।
शुष्कतालुवदनं च तदानीं पद्मभूरपि परिभ्रमति स्म ॥ २।१३

महाकवेरनुपमप्रतिभायाः सरम्भ एव सम्भ्रमस्य एतादृशं परितः स्फुरदिव जीवदिव चित्रं चक्षुःसमक्षं साक्षात्कारयितुं प्रभवति। एतादृश-प्रातिभ-ज्योतिषा दीप्यमानस्यास्य कवेरनवद्ये स्वविषयेऽनायासमेव यमकादय उपमादयश्चालङ्कारा अहमिकया प्रकाशिता जायन्ते। यथा हेमन्तचित्रणे—

कञ्चुकाहरणातङ्ककातराणां मृगीदृशाम् ।
दयालुर्हेमनो वायुर्ददौ रोमाञ्चकञ्चुकम् । गं० ४।१३

तथैव द्युलोकादवतरन्त्यां भागीरथ्याम्—

आविरञ्चिगृहमा हिमाचलं निर्मला रुरुचिरे तदूर्मयः ।
स्वर्वधूभिरभितो विदृक्षया पातिता इव कटाक्षरेखिकाः ॥ ५।४६

नीलकण्ठः पुराकथां मानवीय-रागैर्यथा रञ्जयामास तथा कालिदास-भवभूत्योरन्यः कदाचिन्न संस्कृतमहाकविषु कर्तुं शशाक। ईश्वरस्येश्वरत्वमपि मनुष्यधरातलेऽधिष्ठितं सदेव धन्यतां दधातीत्यवितथं तथ्यं कालिदासानन्तरं महाकाव्यक्षेत्रे नीलकण्ठ एव विशदीचकार। अतो न केवलमक्लिष्टकलात्मकसौष्ठवेन, जीवनस्य परिस्पन्दैरप्यस्य कविता समुच्छ्वसति। पुराकथायां लोकस्वभाववीक्षण-पुरस्सरं मनुष्यतत्त्वस्याविष्करणं नाम कामप्यपूर्वा चमत्कृतिं तनुते। कुमारसम्भवे कालिदासेन यत् प्रख्योपाख्याप्रसरसुभगं शिवतत्त्वमाभांसितं, तस्य दीप्तया नीलकण्ठ-महाकाव्यद्वयी अपि प्रकाशते। ईश्वरत्वमनुष्यत्वयोरिदं सामरस्यभूतं तत्त्वं नीलकण्ठेन प्राणप्रतिष्ठां कृत्वोपस्थापितम्। एकतस्तु शिवस्यैतादृशः प्रभावः तेजश्च यत् भगीरथानुग्रहाय सहसा प्रयाणाभिमुखे तस्मिन्—

अचिन्तितोपनिष्क्रान्तमालक्ष्य मदनान्तकम् ।
किमेतदिति सम्भ्रान्ताः परिवव्रुस्ततो गणाः ॥ गं० ४।४१

अन्यतः जगति यथा पतिः सहप्रयाणसमये स्वभावतो विलम्बमानां स्वभार्यां प्रतीक्षते तथैव शिवोऽपि—

देवोऽपि स्वयमारुह्य वृषभं वृषभध्वजः ।
देव्या विलम्बमानाया दृष्टिमध्वनि सन्दधे ॥ गं० ४।४६

एकतस्तु गिरिजायाः कापि दिव्यता पवित्रता—

अम्बापि सम्भ्रमासन्नसखीदत्तकरा शनैः ।
पादारविन्दविन्यासैः पावयामास मेदिनीम् ॥ ४।४३

अपरतश्च स्त्रीजनसुलभा मानुष्या इव तस्या इयमेतादृशी लज्जा यत्—

आरोपयन्निव स्वैरमालिलिङ्ग शिवः शिवाम् ।
इति संकथयन्तीषु सखीष्वैक्षिष्ट साऽन्यतः ॥ ४।५४

एकतस्तु शङ्करस्यौपस्थितौ तद्गणानामेतादृशः सम्भ्रमो यत्—

कुतः प्रतिष्ठते देवः कुत्रचेति गणास्तदा ।
पाणिभिर्नयनान्तैश्च पपृच्छुरितरेतरम् ॥ ४।५६

अपरतः सत्यपि शिवत्वेऽनिर्वचनीयप्रभावे च भगीरथसमक्षं पुत्राभ्यां पत्न्या च सह तस्य गमनं, न सहसा आविर्भावः, भगीरथं प्रति नर्मालापस्तत्र पारिवारिक-सम्मोदं सांसारिकत्वं च संयोजयति । भगीरथेन शंकरदर्शने—

उन्मीलयन् दृशौ किञ्चित् तेन कोलाहलेन सः ।
अप्राकृतं महः किंचिदद्राक्षीदग्रतो दृशोः ॥
तस्यान्तः पुरुषं कंचित्तरुणेन्दुशिखामणिम् ।
सान्द्रीभूतशरच्चन्द्रचन्द्रिकाभं ददर्श सः ॥
निर्बन्धक्लान्तभूषाहिनिर्दयाघ्रातमूर्च्छितम् ।
बोधयन्तं पुनः स्कन्दं चूडाचन्द्रसुधाकणैः ॥
कपालानि शिरःस्थानि स्कन्धे प्रत्येकशो विधेः ।
दत्त्वा तदीयजिज्ञासौ गणेशे कुपितं मृषा ॥ (४।६३,६४,६५.६८)

अथ स्वात्मानमपराधिनं कलयतो भयकातरस्य भगीरथस्यशिवेन उदाराशयैर्वचोभिः परिसान्त्वनम्, तस्य तत्क्षणमेव गङ्गावधारणाय सन्नाहश्च विचित्रमपि कारुण्यपूरपरिपूरितं मानवसुलभं चरित्रं प्रकटयतः शङ्करस्य—

अभिषेकप्रियाणां नः प्रियमेतद् कृतं त्वया ।
नापराद्धं पुनः किञ्चिदित्युवाच तमीश्वरः ॥

अभिधाय वृषात्तूर्णमवरुह्य महेश्वरः ।
निषसाद पुरस्तस्य निर्मले स्फाटिके तले ॥
आबध्य चर्म वैयाघ्रमपसार्य च बालकौ ।
सावष्टम्भः क्षितावास्त सज्जीभूतो वृषध्वजः ॥
सावलेपनभःसिन्धुसन्निपातोचितं प्रभोः ।
नन्दी विस्रंसयामास नागेन्द्रग्रथिता जटाः ॥ ४।८०-९३

मनुष्यतायां देवतानां देवतासु च मनुष्यतायाः प्रतिष्ठापनेनैव कापि शक्तिर्नीलकण्ठस्य काव्यप्रवाहे समुन्मिषति । तेन च लौकिकी अप्यस्य भाषा-सरणिरलौकिकतत्त्वेनालोकिता आह्लादिता च भवति । शङ्करशिरसि गङ्गानिपाते—

यावदानमयते यथापुरं द्रष्टुमुन्नमितमीश्वरः शिरः ।
तावदेव निपपात तत्र सा विस्मयाय मिषतां दिवौकसाम् ॥ ४।५१

यावद् व्योमविटङ्कसंकुलचलत्कल्लोलकोलाहलै—
रायामीमवतारयन् दुहितरं प्राप्तस्तुषाराचलः ।
तावत्पीतसुरापगोदकपुनर्ध्यधूतसन्दानिताः
सम्मृष्टाश्च पटाञ्चलेन शिवया शम्भोरपश्यज्जटाः ॥
अक्लिष्टपन्नगमजर्जरितेन्दुरेख—
मव्यस्तकाशकितवस्तबकावतंसम् ।
शम्भोरदृश्यत शिरः सुरसिन्धुमुक्त—
दिव्यद्रुमप्रसवसौरभसारसान्द्रम् ॥ ५।६५-६६

मानवीयभावानामाविर्भावेनैव काव्यगतं वस्तु रसावेशवैशद्य-सौन्दर्य-निधानभूतं सञ्जायत इति तथ्यं नीलकण्ठेन स्वकाव्ये प्रयोज्य साधितम् । अवतरन्त्यां भागीरथ्यां तेषां तेषां जनानां मनःसु के के भावा जाग्रति, कथं च मनुष्यसुलभाश्चिन्तास्तेषां चेतांस्यान्दोलयन्तीति अतिसूक्ष्मदृशा तेन चित्रितम् । सर्वः स्वतां पश्यतीति न्यायेन तदानीं सर्वे जना स्वस्वचिन्तायां प्रसक्ता भवन्ति । शारदा स्वपुस्तकं गङ्गाप्रवाहाद् रक्षितुं भवति व्यग्रा, अप्सरसश्च कथं गोपायन्ति-स्वमूलधनम्, बटवोऽनध्यायेन वर्धन्ते, वणिजश्च माऽस्मदा-पणो गङ्गाप्रवाहेण कवलीकृतो भवेदिति चिन्तिताः कथं व्यवहरन्तीति सर्वेषां व्यवहाराः प्रतिक्रियाश्च यथायथं तथ्यसम्मतं च चित्रिताः—

वक्त्रसौधबलभीगता विधेः शारदापि सहसोत्थिता सती ।
उद्गृहीतकरपुस्तका भयादक्षिपद्यु गमिव क्षणं क्षणम् ॥ ५।२०

सम्भ्रमोपगतचारशंसितस्वर्गसिन्धुपतनं पदे पदे ।
सौधभृङ्गवलभीनिवेशितं स्वस्वमूलधनमप्सरो जनैः ।। ५।३०

अगृहीतविवेकमापणानुपसंहृत्य सवेगमेकतः ।
पथिकान् वणिजोऽन्वयुञ्जत क्व नु सा सिन्धुरिति प्रतिक्षणम् ।।

स्थविरेषु गतेषु जाह्नवीसलिलोत्पीडभिया ततस्ततः ।
क्षणमध्वयनोपघाततः परितु टा बटवो विजह्निरे ।। ७।२,३

एवं च लोकानुवृत्तिविमर्शेन, गहनजीवनदर्शनान्तर्व्याप्त्या, उदात्तादर्शानामभिव्यक्त्या, पौराणिकेतिवृत्ते च मानवीयरागकारुण्याद्याविष्करणेन च कविलोके महीयते श्रीनीलकण्ठः । लघुकाव्येषु यथायं क्षेमेन्द्रनिर्विशेषां व्यङ्ग्यगर्भां सामाजिकीं दृष्टिं प्रकटयति, तथैवानुहरति महाकाव्यनाटकेषु कालिदास-भवभूत्योः । अस्य काव्येषु पुनरपि प्राणिति सुरसरस्वती सर्जनापरम्परेति वक्तुं सर्वथा युज्यते ।

मुकुन्दविलासमहाकाव्यम्, तत्काव्यसौष्ठवं च

महाकाव्यस्यापूर्णत्वादन्तिमेयं कवेः कृतिरिति सम्भावना ।[1] शिवलीलार्णवमहाकाव्यवदत्र श्रीकृष्णस्य विविधलीलाविस्तरेण वर्णयितुं नीलकण्ठो निश्चिकाय इति प्रतीयते । किन्तूपलब्धेषु चतुर्षु सर्गेषु कथानकस्यास्फुटप्रायत्वात् कथंविधा प्रबन्धस्य परिकल्पना तन्मानस उल्लसति स्मेति नेदमित्थन्तया ज्ञातुं सुशकम् । शङ्करस्येव भगवतः श्रीकृष्णस्यापि समग्रजीवनचरितवर्णनं नाम असाधारणीं सारस्वतदृष्टिमपेक्षते । नीलकण्ठस्तु आसीदेव तया दृष्ट्या सम्पन्नः । तेन पूरितं, पूर्णतयोपलब्धं वा यदि काव्यमिदमभविष्यत्, तदवश्यमेवेदं सुरसरस्वत्याः कण्ठहारस्थोज्ज्वलतममणिरत्नेष्वन्यतमं स्यात् । किन्तु बहुमूल्यो मणिस्त्रुटितोऽपि यथा स्वप्रभां न जहाति, न च न कण्ठहारीक्रियतेऽलङ्करिष्णुभिस्तथैवापूर्णं सदपि मुकुन्दविलास महाकाव्यं महतीं काव्यसमृद्धिं प्रकटयति, नार्हति च समीक्षकाणामुपेक्षाम् ।

अस्मिन् काव्ये प्रतिसर्गं कथावस्तु इत्थं विन्यस्तम्—

---

१. मुकुन्दविलासमहाकाव्योल्लेखो नीलकण्ठेन स्वकृते नलचरित्रनाटके विहित इति सूचयति श्रीकृष्णमाचार्यः [Hist & Sans- Lit. P907] । अथ नलचरित्रनाटकस्य संस्करणद्वयं प्राप्यते-प्रथमं बालमनोरमातः १९२५ तमे वर्षे प्रकाशितं षष्ठाङ्कम्, अपरं च मुम्बईतः प्रकाशितं सप्ताङ्कम् । प्रथम–संस्करणे प्रस्तावनायां नास्ति मुकुन्दविलासस्य कापि सूचना, सम्पादकः श्रीशिवरामशास्त्री सूचयति तदूनविंशशतकभवो लेखको वीरराघवोऽपूर्ण- मिदं नाटकं पूरितवान् । तथात्वे सति मुम्बई-संस्करणस्थ उल्लेखः सन्देहापदमेव ।

प्रथमे सर्गे गिरेः सुमेरोश्चमत्कारपूर्णं वर्णनं प्रस्तूय तस्मिन् धातुस्तत्पारिषदानां च देवानामुपस्थितिः, दैत्यापसदत्रासतरलहृदयाया भगवत्या भूतधात्र्यास्तत्रागमनं, स्वव्यथा निवेदनं च, विधातृसहितैः देवैस्तया सह विष्णुसमीपं-गमनं, कंसवधार्थमवतरिष्णुना विष्णुना च समेषां सान्त्वनं वर्णितानि।

द्वितीये सर्गे उग्रसेनस्य भूपतेरुदात्तं चारित्र्यं चित्रीकृत्य कंसजन्म तद्यौवराज्यम् तत्कृतं पितुः कारागारबन्धनम्, देवक्या विवाहः वसुदेवस्य च कंसाय स्वापत्यसमर्पणप्रतिज्ञेत्यादिकं वृत्तं निरूपितम्।

तृतीये सर्गे श्रीकृष्णस्याद्भुतं जन्म, चतुर्थे च वृन्दावनसमुल्लासश्चित्रितः।

यथा कुमारसम्भव-गङ्गावतरण-शिवलीलार्णवमहाकाव्येषु शिवस्य चित्ताकर्षको विग्रहः प्रभावश्चानितरसाधारणसमाधि वगाह्यैकनिष्ठया वर्णितस्तथैवात्र विष्णोर्विग्रहोऽपि महाकविनाऽसाधारणकल्पनाशक्त्या तन्मयीभावेन च विहितः—

दूरं धियां दूरतरं च वाचामदूर एवाच्युतमालुलोके॥
इन्दीवरश्यामलमिन्दिराङ्कपर्यङ्कविश्रान्तपदारविन्दम्।
अस्पन्दमत्यन्तगभीरभावादानन्दसिन्धोरिव मध्यभागम्॥
आम्नायवाचामनुजायमानैरापुर्विभागावधिभिः सुराणाम्।
आनन्दनिःश्वासलवैः सुगन्धैराधूतपीताम्बरमीषदग्रे॥

यादृशमलौकिकमुदात्तं च वर्ण्यवस्तु तादृशी एवालौकिकी उदात्ता कवेः प्रतिभेत्यनयोः परस्परेण स्पृहणीयशोभो मणिकाञ्चनयोगो नीलकण्ठकाव्ये घटितः। तथैवास्य निर्दुष्टा सौन्दर्यदृष्टिरपि सर्वत्र कमनीयां सृष्टिं विधत्ते। पृथिव्या धातारं प्रति गमने—'पद्भ्यामियं पङ्कजलाञ्छिताभ्यां पस्पर्श यं यं पथि देशमार्या। प्रादुर्बभुवुः स्थलपङ्कजानि तदा हि तत्रेति विभावयामः' ॥१।३८।

एवमेवास्य भाषापि यथानुरूपाभिव्यक्तिमनुसरति। **'निर्वेदमन्दाक्षनिसर्गसन्नामपि प्रसन्नां गिरमाददे सा'** (१।५०), **'क्षमे क्षमेथाः क्षणमित्युदीर्यं·····**(१(७४), **'यमुनाममुना तरन्तसावपि तीर्णं बुधे भवार्णवम्'** (३।६२)—इत्यादिपद्येषु यथा भाषाया मसृणता मनो हरति, तथैवानेकत्राभिव्यक्तिसौष्ठवमपि सुतरां विलसति। कविरयं सौन्दर्यदर्शनेऽलौकिकलावण्यं सद्योऽनुभावयति। तद्यथा देवकी-वसुदेवयोः समक्षं विष्णोः प्रादुर्भावे—

करुणार्द्रदिगन्तचुम्बितश्रवणान्दोलितरत्नकुण्डलम् ।
क्व वयं क्व विचिन्वते जना इति जातस्मितमौषदानने ।।
अतसीकुसुमाभमावृतं मृदुना हेममयेन वाससा ।
अभितश्छुरितं विकस्वरैररविन्दैरिव यामुनं ह्रदम् ।।
कनकाम्बरसुन्दरं ततो मणिकेयूरकिरीटसुन्दरम् ।
निजधातुनिसर्गसम्पदा निखिलं चैतदतीत्य सुन्दरम् ।। (३।३६-३९)

क्वचिदयं वात्सल्यभावान् सौन्दर्यनिधानभूतान् कृत्वा प्रकटयति । यथा बालकृष्णदर्शने—

उल्लच्चरणपल्लवं मनागुद्यदिन्दुशतकोटिसुन्दरम् ।
तन्निरीक्ष्य तरुणोत्पलश्रियं सा जहौ निखिलमान्तरं तमः ।। (४।२)

काव्येऽस्मिन् उपमारूपकादीनामनुत्तमसुषमा मौलिकता च मनो हरति । यथा स्वविनाशपिशुनां नभोवाणीं श्रुतवतः कंसस्य—

सा कर्णजाले पतितैव तस्य वाणी मतिं व्याकुलयाम्बभूव ।
आवर्तितं दुग्धमिवाम्लसारो यत्नार्जितं धर्ममिवानुवादः ।। (२।५४)

यथा वा भगवत्या वसुधाया वर्णने—

सान्द्रद्रुमश्रेणिनिबद्धवेणिः सरित्सरःस्तन्यसुधारसार्द्रा ।
शैलस्तनी सागरमेखला सा स्वायम्भुवं धाम समाजगाम ।।
पद्भ्यामियं पङ्कजलाञ्छिताभ्यां पस्पर्श यं यं पथि देशमार्या ।
प्रादुर्बभूवुः स्थलपङ्कजानि तदा (हि) तत्रेति विभावयामः ।।
(१।३७-३८)

मुकुन्दविलासे यथोदात्तता तथैव प्रातिभोन्मेषचारुतापि शोभते । यथा ससत्त्वाया देवक्या वर्णने—

भरणेन पितुर्गरीयसी जननीत्यागमवेदिनो विदुः ।
भरणं च यदाश्रयेण तत् कुचकुम्भं गुरु सर्वतोऽभवत् ।।३।३

द्रुत-हेमविनिर्मलेऽथ तत् जठरे रोमलतापदेशतः ।
तनयः प्रतिबिम्बते स्म किं तरुणेन्दीवरवृन्दसुन्दरः ।।३।६

एवमेव वृन्दावनवर्णने—

स्फारदुग्धदधिपूरमाबभौ पाररूपितशिलीभवद्घृतम् ।
क्षिप्यमाणनवनीतकन्दुकं स्निग्धपिच्छिलपथं च गोकुलम् ।। (४।१३)

क्वचिद् वर्षर्तुवर्णनेऽन्योक्तीनां घटा—

सुहृदश्चलितान् यथायथं प्रसवातिव्यधितां च भामिनीम् ।
कलयन् मुखरे पयोधरे कलहंसो न मृतो न जीवितः ॥

परिपूर्णमुपोष्य वत्सरं प्रथमाम्भःकणिका जिघृक्षया ।
समुदस्यति चातके मुखं कथमस्मिन्नपतत् करोपलः ॥

[३।२४,२५]

क्वचिन्नूतनाभिव्यक्त्या स्वशब्दप्रयोगचातुरीं प्रकटयति कविः । यथा—'भूर्निजितैवेति भुजोष्मणि स्वे तृप्तिं न गच्छन्ति भटा यदीयः'—(१।२४) - इत्यत्र भुजोष्मणः पदस्य प्रयोगः । कविरयं क्वचित् वाल्मीकि-कालिदासयोः प्रशस्तं पन्थानं विहाय माघादीनां सङ्कीर्णां सरणिमूरीकुरुते । तथात्वेऽतिशयोक्तिभिरत्यन्तं ग्रस्यन्तेऽस्योक्तयः । यथा—सुमेरोः वर्णने । तथैव मथुरावर्णनेऽपि—

चन्द्रातपं सौधशिखाधिरोहा—
न्मदानिलं जालपिधानतश्च ।
जित्वापि यस्यां विरहे व्यथन्ते
नादैः स्त्रियो नन्दनकोकिलानाम् ॥

तापासहद्भिस्तरुणीभिरन्त-
र्दत्तार्गले यत्र गवाक्षमार्गे ।
प्रयाति हर्म्यं परिवृत्य भाना—
वहानि हर्म्येषु भजन्ति वृद्धिम् ॥

उत्तीर्य पाथोधिमिमं हनूमा—
नुदम्य कैलासममुं दशास्यः ।
कीर्त्तिं प्रपेदे कियतीमिवेति
हर्म्यस्थिता यत्र जना हसन्ति ॥ २।२-४

अथायं गड्डुलिकाप्रवाहन्यायेन संस्कृतसाहित्यस्य ह्रासकाल इति कथिते समये समुत्पन्नः कविर्नीलकण्ठः संस्कृतस्य नूतनोल्लासं रम्यनिर्माणशालित्वमजरत्वममरत्वं च ख्यापयन् कस्य विदुषो बहुमानास्पदं न स्यात् ? किं बहुना—

लावण्यं कालिदासस्यानुभूतिं भवभूतितः ।
मृदुतां माघकाव्यस्य भारवेरर्थगौरवम् ॥
क्षेमेन्द्रस्य नर्ममर्मां सुतीक्ष्णां च प्रगल्भताम् ।
निर्वेदं भर्तृहरितः कल्हणस्येतिवृत्तताम् ॥

कृत्स्नमेतत् समादाय प्रज्ञागर्भे निवेश्य च ।
प्रतिभां नीलकण्ठस्य नीलकण्ठो विनिर्ममे ॥

अस्य च महाकवेर्नीलकण्ठस्येदम्प्रथमतया प्रकाश्यमानं प्रकृतकाव्यं यथा काव्यरसिकेषु तथैव संस्कृतसाहित्यानुसन्धाननिरतेषु पण्डितेषु छात्रेषु च लोकप्रियं भवेदिति विश्वसिति--

राधावल्लभः त्रिपाठी ।

प्रथमः सर्गः

विश्वम्भराश्वासनम्

श्रीकण्ठवेधोगिरिशास्त्रयोऽपि श्रीगर्भकोशे शयिता यदीये।
तामद्वयानन्दचिदेकरूपां शैवीं परां शक्तिमनुस्मरामः ॥१॥

नारायणेति श्रुतिमङ्गकेन नाम्ना यदाविष्कृतमागमेषु।
तत्पौरुषं तामरसायताक्षं तस्य स्तुमो[1] रूपमशेषरूपम् ॥२॥

स्वच्छन्दवृत्ता अपि यत्प्रसादान्मुक्ताः पशूनां पशवोऽपि गोपाः।
तन्मादृशानामनिदानबन्धुं वाचार्चये यादववंशनाथम् ॥३॥

आस्ते भुवो भूषणमद्रिराजः सर्वोत्तमो मेरुरिति प्रतीतः।
अधित्यका यस्य पुरी सुराणामुपत्यका सागरनेमिरुर्वी ॥४॥

नमोऽस्तु नारायणदीक्षितेभ्यो न केवलं ये जनका ममैव।
किन्तु त्रयाणामपि विष्टपानां गृहाश्रमेऽप्यात्मरहस्य बोधात् ॥५॥

लब्धापि दिष्ट्या सकृदभ्रगङ्गा लग्नानयत् क्वापि भुवि स्रवन्ती।
ततो नु धन्वेति[2] यमाजहार पुरा जिगीषुस्त्रिपुराणि देवः ॥६॥

नीलाश्मसानुत्विषि यस्य मग्नं नीलं नभोद्यापि जनेषु रूढम्।
सान्ध्यश्च रागः कुरुविन्दसानुश्छायैव[3] सान्द्रा रविसन्निकर्षात् ॥७॥

तिर्यञ्चमूर्ध्वन्ननतमग्रतोऽपि यमेव तावद् बहुधा गृणन्तः।
धामापि विद्मो न दिवौकसां ये विद्मो वयं ते कथमीशमाद्यम् ॥८॥

यन्मूलजम्बूसरिदम्बुलेशाः प्रायो विकीर्णाः परितः पयोधौ।
तत्रत्यमम्भः पिबतां सरावं[4], धाराधराणां तडितो भवन्ति ॥९॥

---

१. 'तस्यास्तुमो' इति 'ख' मातृकायाम्।
इन्द्रवज्रावृत्तमस्मिन् सर्गे। क्वचिदुपेन्द्रवज्रापि। क्वाप्युपजातिः।

२. धन्वम् (नपु०)—√धन्+वद्—धनुषि।
धन्वन् (पु० नपु०)—√धन्व+कनिन्—नभोवेलामरुभूमिषु।

३. 'कुरुविन्दसानुच्छा०'—इति क—मातृकायाम्।

४. 'तराव' इति 'ख'—मातृकायाम्। ४. तटितो०—।

जीर्णानि पर्णानि हिरण्मयानि जाम्बूनदे चाम्बु निषेवमाणाः ।
हिरण्यगर्भा अपि यत्र सिद्धास्तपोभिरिच्छन्ति चतुर्मुखत्वम् ॥१०॥

दावानलोत्तप्तयदीय [शृङ्गान्] निष्यन्दसारैरभितः पतद्भिः ।
कालेन सम्पद्य हिरण्मयी भूः जज्ञे ऽद्भुतं वर्षमिलावृताख्यम् ॥११॥

वातावधूता इव तूलपिण्डा भ्रमन्ति केचिद्दिवि ये विमानैः ।
[स्वर्गोस्थिति] सांशयिकीं विदन्तः सुधान्धसो यत्र सुखं वसन्ति ॥१२॥

न स्वर्गिणःकाञ्चनमाद्रियन्ते मर्त्यास्तुनामापिनमेवयन्ति [विदन्ति] ।
कस्मै ममेयं कनकात्मतेति ह्रियेव निर्मज्जति भूतले यः ॥१३॥

अतीतजीमूतपथासु यस्मिन् आरामसीमासु महीरुहाणाम् ।
रत्नालबालान्यभिपूरयन्ति विद्राव्य गानेन सुरावरोधाः ॥१४॥

प्ररोहतां पार्थिवतैजसेषु तटेषु यस्मिन्नभितस्तरूणाम् ।
ज्योतिर्मयी गन्धरसोत्तरा च सम्पद्यते पुष्पफलप्रसूतिः ॥१५॥

वर्षार्धरूपेषु दिनेषु यस्मिन् अभ्यस्य निद्राजयमात्तशिक्षाः ।
अस्वप्नतामानशिरे क्रमेण तटालया इत्यवधारयामः ॥१६॥

परीत्य मूलं परितो वहन्त्या सन्दश्यते यः सरिता सुराणाम् ।
जाम्बूनदैकात्मतया समन्ताद्रत्नानुषङ्गार्जितपाण्डिमैव ॥१७॥

महीं दिवं मन्दिरमौरगं च मध्याग्रमूलैरपि धारयन् यः ।
भूभृत् सरावंव्यवतिष्ठते[1] चेत् कृत्या कया कीर्तिपै मुतुलोकः ॥१८॥

षण्मासदीर्घासु निशासु यत्र चक्राविसंज्ञाश्चिरविप्रयोगात् ।
संज्ञामवाप्यापि शनैः प्रभाते संस्कारलोपान्न मिथो वदन्ति ॥१९॥

ये भिक्षवो येऽपि च सार्वभौमाः सर्वेऽपि ते स्वं कणमर्थयन्ते ।
बिभ्रद् भुवं भूभृदतो य एव भूभारभूतैर्गिरिभिः किमन्यैः ॥२०॥

हिरण्यवर्णोऽय हिरण्यकेशो हिरण्मयश्चानखराधीति (?) ।
संरभ्य संरभ्य गिरोऽपि दिव्याः ज्योतिःपरं-धर्म यमामनन्ति ॥२१॥

जाताः सुधाब्धेरबहिर्बहिश्च जाम्बूनदीतोयकृतोपयोगा ।
नित्योन्मिषद्यौवननिर्भराश्च यत्र स्त्रियो जीवकलाः स्मरस्य ॥२२॥

---

१. भूभृत्त्वराव०—इति 'ख'—मातृकायाम् ।

सर्वत्र सन्त्येव दिशामधीशाः सन्त्यष्टमास्तेषु च रुद्रभेदाः ।
तेषां हिरण्यस्य पतिर्यदीयो भिक्षाशिनो दिग्वसनास्ततोऽन्ये ॥२३॥

आपः पुरा यच्छिखरानुषङ्गादवाप्तहेमद्युतयोऽभ्रसिन्धोः ।
हिरण्यवर्णास्तत उत्पुनीतेत्युद्घुष्यमाणाः श्रुतिभिर्जयन्ति ॥२४॥

उपत्यकायां करकेण किञ्चिदुत्सृष्टमम्भः पथिरेषु मर्त्यैः ।
अधित्यकायाममृतायमानमास्वाद्यतेऽद्यापि सुवर्णकुम्भैः ॥२५॥

सान्निध्य एवाखिलरत्नधाम्नः सर्वामरैकायतनस्य तस्य ।
निःशङ्कमन्येऽपि विशन्ति शैलाः का नाम शंकालिततत्रपाणाम् ॥२६॥

द्यौर्निर्जराणां पृथिवी नराणामिति व्यवस्थामतिलङ्घ्य धातुः ।
आक्रामतां यद्युसदामनीति दृष्ट्वैव मर्त्याश्च दिवं प्रयान्ति ॥२७॥

शृङ्गेषु यस्याच्छमणीमयेषु गङ्गानिपातह्रदमण्डलानि ।
मत्वा भुवं वज्रमधीत्य जन्तो महर्षयः स्नातुमपोऽर्थयन्ते ॥२८॥

निर्मातुकामो भुवनानि वेधाः निखायमध्ये किल शङ्कुमेनम् ।
पाशं यमादौ पुरतश्चकर्ष जम्बूनदी सा जलधिं प्रविष्टा ॥२९॥

सन्तः कियन्तः समहेमलोष्टा घोरं तपस्यन्ति चिरायतेऽपि ।
अन्ते भजन्ते त्वमुमेव हैमं मिथ्यैव मिथ्यैव ततो विरागः ॥३०॥

धामेति देवाः कियदत्रमूढाः धन्वेति शम्भोश्च कियान् प्रहर्षः ।
अहोमहन्मोहनमेतदेकमाप्रौढमूढं कनकं किलेति ॥३१॥

इत्थं यदिष्टं पदमामहेन्द्रादिदं सुखेनापहरन्ति विप्राः ।
केचिद्यवैः केचनकन्दमूलैः केचित् पुनः केवलयापि वाचा ॥३२॥

आक्रामतां स्थानपदं जनानामालक्ष्य सम्बाधमसूययैव ।
शास्त्राणि पूर्वे शतशः प्रणिन्युर्धीमत्तमा दृश्यमिदं मृषेति ॥३३॥

शैलैश्चतुर्भिः परितो महद्भिः कीलैरिवाहत्य निबद्धमूलः ।
आन्दोल्यतेऽसावपि हेतुवादैरतः कुतर्का बलिनो बलिभ्यः ॥३४॥

सम्पातभूमौ जगतां त्रयाणां तस्मिन् गिरौ जातु सभां प्रविष्टः ।
देवो ददौ दर्शनमब्जयोनिर्देवर्षिसिद्धासुरपन्नगानाम् ॥३५॥

निध्यायतं योगदृशा चिराय लब्धं प्रसादावसरं विधातुः ।
दुर्दान्तराजाधमभारखिन्ना देवी धरित्री तमवाप देशम् ॥३६॥

सान्द्रद्रुमश्रेणिनिबद्धवेणिः सरित्सरःस्तन्यसुधारसार्द्रा ।
शैलस्तनीसागरमेखला सा स्वायम्भुवं धाम समाजगाम ॥३७॥

पद्भ्यामियं पङ्कजलाञ्छिताभ्यां पस्पर्श यं यं पथि देशमार्या ।
प्रादुर्बभूवुः स्थलपङ्कजानि तदा (हि) तत्रेति विभावयामः ॥३८॥

अम्भोजमुच्छत्रदशामगृह्णन् वन्याः समीरा व्यजनाधिकारम् ।
चित्राः कथाः श्रोतृसुखा बभूवुः स्निग्धानि तस्यां वयसां रुतानि ॥३९॥

दहन्ति दावैर्दलयन्ति सीरैराघ्नन्ति भारैरपि वृत्तये ये ।
ये च स्वधर्मैरनुगृह्णते स्वं सर्वंसहा तान् सममालुलोके ॥४०॥

यां सर्वभूतप्रकृतिं गृणन्ति यस्यां समाप्तौ विधिपर्युदासौ ।
भूतानि वत्सा इव मातरं तां भौमानि दिव्यान्यपि चानुपेतुः ॥४१॥

छाया सुसिद्धाश्रमपादपानां विश्रम्य विश्रम्य कृतक्रमां ताम् ।
कर्मन्दिनः कर्मफलोपहारैरानर्चुरग्र्यैरपि वाक्प्रसूनैः ॥४२॥

चराचराध्यासपदत्वहेतू शक्ती विभोर्द्वे (हि?) चितिर्धृतिश्च ।
आद्यां तयोरब्जगृहामुशन्ति त्वामुत्तमां तत्त्वविदः पुराणाः ॥४३॥

त्वय्यावपन्तः सुकृताङ्कुराणि सम्प्लावयन्तोऽतिथिदानतोयैः ।
कालेन पक्वं फलमाददाना वृत्त्यानया केचन वर्तयामः ॥४४॥

य एष कोशः प्रथमेचरो नो यश्चाप्यसौ चित्तमयस्तृतीयः ।
दध्नोऽथ दध्नो यदिदं समस्तं देवि प्रसादेन तव प्रसूतम् ॥४५॥

इत्थं स्तुवद्भिर्मुनिसिद्धसंघरन्वीयमाना शिखरे सुमेरोः ।
भक्त्या (च) भारेण च सन्नता सा विश्वम्भरा विश्वसृजं ववन्दे ॥४६॥

पिबन्निवेमां बहुमानपूर्णैरष्टाभिरप्यक्षिभिरब्धिकाचीम्[1] ।
वाचा सुधासारमुचान्वयुङ्क्त वार्ता विधिः स्थावरजङ्गमेषु ॥४७॥

कच्चिन्नृपाः शासति धर्मतस्त्वां कच्चित्प्रजाः स्व स्वपथे प्रवृत्ताः ।
कच्चिन्न निर्वाति तवार्द्रभावः कालेन मेघापहृताभिरद्भिः ॥४८॥

पृथ्वीति नाम्नासि परं प्रतीता कृशासि किं देवि विना निमित्तम् ।
किं पर्वतद्वीपवनार्णवेषु किञ्चित्कृतं केनचिदन्यथेति ॥४९॥

---

१. काञ्चीम् ।

कृतोपचारा कुशलानुयोगात् खेदेन निःश्वस्य चिरं कदुष्णम् ।
निर्वेदमन्दाक्षनिसर्गसन्नामपि प्रसन्नां गिरमाददे सा ॥५०॥

यस्यां मयीत्थं भगवान् दयेत तस्या मम स्यादशुभं कुतो वा ।
वर्षेषु दिव्येषु शुभं सदैव न स्थापिता येषु युगव्यवस्था[1] ॥५१॥

दैत्येश्वरैः स्वीकृतराजवेषैः प्राप्तो भरो भारतवर्षसीम्नि ।
सर्वेन कोणेऽपि···इह···स्थिताम्प्रदे···(दापिता)·· कण्टकसूचिकेव ॥५२॥

दृष्टा न किं दानवदैत्यसंघाः प्रादुर्बभूवुः परमेकशस्ते ।
सम्प्रत्यसंख्याः शलभा इवेमे भीहेतवे (मे) कति सम्बभुवुः ॥५३॥

प्रादेशमात्रं मयि पातिकोऽपि वितस्तिमन्यो विपुलावलेपः ।
अरत्निमात्रं यदि पालयेत तद् दर्शनं नाथ तवाप्यलभ्यम् ॥५४॥

नाहं वरो कस्यचिदस्मि जातु न मे प्रदाता न च मे गृहीता ।
वृथा मदर्थे कृतसङ्गरास्ते नश्यन्ति साधूनपि नाशयन्ति ॥५५॥

अमोघकोपैरफलप्रसादैरारूढसार्वज्ञपदैरकस्मात् ।
हिंसानृतेर्ष्यारुचिभिर्दुराशैर्नहि ध्रिये नाथ नृपालपाशैः ॥५६॥

भाराय न स्त्रीण्यपि मे जगन्ति भारो महानेकतमोऽप्यमीषाम् ।
शाखामृगोपप्लवदुःसहा हि शाखा फलैर्न व्यथते तरूणाम् ॥५७॥

उत्पातवातभ्रमितामकाण्डे नावं पतन्तीमिव सिन्धुगर्भे ।
कृत्याधुनैरोद्धर मां कियत्या मां भूद् विरह्लस्तव भूतसर्गः ॥५८॥

इत्थं तया वेदितकार्यभारः सद्यः समुत्थाय पतिः प्रजानाम् ।
सार्धं धरित्र्या च सुरैरयासीत् तत्रैव दिव्यं भवनं मुरारेः ॥५९॥

प्रणम्य भक्त्या परया विधिस्तं प्रसाद्य विद्याप्ततया च वाचा ।
दूरं धियां दूरतरं च वाचामदूर एवाच्युतमालुलोके ॥६०॥

इन्दीवरश्यामलमिन्दिराङ्कपर्यङ्कविश्रान्तपदारविन्दम् ।
अस्पन्दमत्यन्तगभीरभावादानन्दसिन्धोरिव मध्यभागम् ॥६१॥

आम्नायवाचामनुजायमानैरायुर्विभागावधिभिस्सुराणाम् ।
आनन्दनिःश्वासलवैः सुगन्धैराधूतपीताम्बरमीषदग्रे ॥६२॥

---

१. तुलनीयम् रघुवंशे ५।१३

फ (णा) मुखात्युद्भटतद्धिताश्मगर्भे भुजङ्गे करभोगतल्पे ।
निद्रामलब्ध्वैव सुखं कदापि नित्यं प्रजारक्षणजागरूकम् ॥६३॥

निद्रावसानालसनिर्मलानां मुद्राभिदां मूकजनाननेऽपि ।
नेत्राञ्चलानां परमस्य धाम्नः पात्रं विधिः प्राथमिकं बभूव ॥६४॥

कृतार्थयन्त्या भुवनानि शौरेः कृतानुयोगः शुभया स दृष्ट्या ।
आचष्ट कुर्वन् धुरि भूतधात्रीमनक्षरं कारणमागमे स्वे ॥६५॥

श्यामामणिः श्यामलगात्रयष्टिश्चक्रस्तनी चक्रधरं युवानम् ।
विश्वम्भरा भक्तिभरावनम्रा विश्वम्भरं सा दयितं ववन्दे ॥६६॥

आद्यावताराध्यवसायसौम्याः पेतुर्यदा भर्तृदृशो जगत्याम् ।
परापतन् दैत्यकुलात्तदैव भव्या दृशो भार्गवनन्दनायाः ॥६७॥

माहात्म्यभीतान् कमलासनादीन् मन्दाक्षखेलस्तिमितां च देवीम् ।
अपाङ्गधन्व्या हरति स्म साक्षादामन्त्र्य सर्वानिदमब्जनाभः ॥६८॥

जाने मदभ्यागमहेतुमस्या जाने च वः साधयितव्यमर्थम् ।
जाने च दुर्विक्रमगर्वितामभ्युद्गमं दानवबुद्बुदानाम् ॥[1]६९॥

नेमे निरस्ता कति नाम वारान्नोन्मूलिता वा तु परं समूलम् ।[2]
अद्यास्तु शेषः सहनीय एष मन्तुर्मम क्षुद्रजनावमन्तुः ॥७०॥

अहं भवेयं वसुदेवसूनुर्लक्ष्मी भवित्री भुवि रुक्मिणीति ।
साव्राजिती सागरमेखलासु भ्राता ममायं भविता फणीन्द्रः ॥७१॥

सुरा निजांशैः सृजतान्वयेषु राज्ञां विधेयान्मम शासनेषु ।
आविर्भवन्त्वप्सरसोऽपि तावदाभीरराजन्यकुलेषु तास्ताः ॥७२॥

आज्ञापयन्नित्थममर्त्यसंघानथानुमेने गमनं विधातुः ।
योगेश्वरः स्वामपि योगमायां वव्रे सखीं दैत्यवधे तदैव ॥७३॥

आनीय पार्श्वं वसुधामथास्याः परामृशन् पाणितलेन पाणिम् ।
क्षमे क्षमेथाः क्षण (मित्यु) दीर्यं विनीतखेदां विससर्ज सद्यः ॥७४॥

इति निशम्य वचो निखिलं हरे—
निववृते सुरसिद्धगणो यदा ।

---

१. तुलनीयम् रघुवंशे १०/३८

२. मूलितां पातु परमिति—'ख' मातृकायाम् ।

प्रववृते च तदा तु पदे पदे—
दनुजवेश्मसु दुःशकुनोदयः ॥॥७५॥[1]

आसन्नचिन्तिततरमारमणावतार—
लीलामनोरथशतैर्दिवसान् क्षिपन्ती ।
सद्यो लघूकृतभरेव सुखेन रेमे
सर्वंसहा भगवती सह वासवाद्यैः ॥७६॥[2]

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठ—
मतप्रतिष्ठापनाचार्य-चतुरधिकशत—

प्रबन्धनिर्वाहकमहाव्रतयाजिश्रीमद प्पयदीक्षितसौदर्य-
श्रीमदच्चा - दीक्षितपौत्रेण - नारायण - दीक्षितात्मजेन-
भूमि-देवीगर्भसम्भवेन नीलकण्ठेन विरचिते
मुकुन्दविलासे विश्वम्भरानिर्वासनं नाम प्रथमः सर्गः ॥१॥

---

१. द्रुतविलम्बितमेतत् ।
२. वसन्ततिलकाच्छन्दः ।

।। अथ द्वितीयः सर्गः ।।

[रमारमणोदयः]

आस्ते पुरी काप्यपवर्गभूमिर्मध्ये धरित्र्या मधुरेति नाम्ना ।
आलिङ्गिता भानुसुतातरङ्गै रम्यर्थ्य माधुर्यजिघृक्षयेव ।।१।।

चन्द्रातपं सौधशिखाधिरोहान्मन्दानिलं जालपिधानतश्च ।
जित्वापि यस्यां विरहे व्यथन्ते नादैः स्त्रियो नन्दनकोकिलानाम् ।।२।।

तापासहद्विभस्तरुणीभिरन्तर्दत्तार्गले यत्र गवाक्षमार्गे ।
प्रयाति हर्म्यं परिवृत्यभानावहानि हर्म्येषु भजन्ति वृद्धिम् ।।३।।

उत्तीर्य पाथोधिमिमं हनूमानुदम्य कैलासममुं दशास्यः ।
कीर्तिं प्रपेदे कियतीमिवेति हर्म्यस्थिता यत्र जना हसन्ति ।।४।।

सौधाग्ररोहज्जलयन्त्र[1]—तोयसम्पातनिष्यन्द[2]--विवर्धितानाम् ।
अर्घ्यं प्रसूनेष्वमरद्रुमाणां गृह्णन्ति धर्मेण पथा यदीयाः ।।५।।

यस्यामजस्रं यजतां द्विपानां हव्यं सुरैः प्राशितुमापतद्भिः ।
शून्यानि सुत्रामपुरी न शून्या सौधाध्वनः पौरगतागतेन[3] ।।६।।

अकालवर्षेषु घनापसारमाशङ्कमाना श्रवणानिलेन ।
आधोरणा यत्र न चारयन्ति द्विपाण्यहानिद्विरदानुदारान् ।।७।।

निषादिभिर्यत्र सहानुलापान्निषादिना निर्जरसिन्धुराणाम् ।
अवेतनामाक्षिपतः स्वसेवां सान्त्वैः सुराः सन्ततमर्थयन्ते ।।८।।

अभूतलादस्खलितप्रचाराः खेयेषु मग्नाः करिणो विहारे ।
भद्रा इमे भारवहाः किलेति दिग्दन्तिनो यत्र विडम्बयन्ते ।।९।।

फालानिलेन प्रलयेषु शम्भोः पीतेषु सप्तस्वपि सागरेषु ।
तत्पूरणायैव यदीय-खेये[4] तावन्ति वेधा निदधे पयांसि ।।१०।।

---

१. जोहज्जलमन्त्र० —ख ।

२. विष्यन्द०—ख ।

३. सौधाध्वनापौर० —ख ।

४. खेयं (नपु०) परिखा-गर्ताद्यर्थे । √खन्+क्यप् इकारादेशः।

प्राकारमूलोपलपट्टिकानां प्राथम्यचारम्यवशेन यस्याः।
भवन्ति पाताल-तलातलादिपर्वव्यवस्थाः फणिलोकभाजाम् ॥११॥

प्राप्ता दिवं हर्म्य-शिखाम्बुयन्त्रैः पातालमूलं परिखापथेन।
यस्यां वहन्ती यमुनापि लेभे स्रोतस्त्रयं त्रिष्वपि विष्टपेषु ॥१२॥

स्वर्लोकभोग्यादपि सुन्दराणि वस्तूनि लभ्यानि यदापणेषु।
स्वर्भोग एव स्वयमीप्सितं चेत् सोऽप्यत्र तोयव्ययमात्रलभ्यः ॥१३॥

विप्रा अपि स्वर्गजितः पुरे नः किं दीर्घकीटावसथेऽपि जेयम्।
भूर्निर्जितैवेति भुजोष्मणि स्वे तृप्तिं न गच्छन्ति भटा यदीयाः ॥१४॥
यत्सन्धयोऽन्यत्र तु राजवीथ्यो यद्राजवीथ्यः परितो नगर्यः।
कृत्स्ना पुनर्या नगरी परत्र देशो भवेद्वा जगती भवेद्वा ॥१५॥

अन्तर्बहिश्चार्णवचक्रवालौ सन्तौ गिरां नूनमजामितायै।
व्यत्यस्य यस्यां लसतः सुखेन प्राकाररेखापरिखापदेशात् ॥१६॥

अहर्दिवं यत्र निरुद्यमानौ हर्म्यैर्बलान्मोचयितुं रवीन्दू।
परीत्य सालं परिपूर्य खेयं शङ्केऽवतेरुः कमलोत्पलानि ॥१७॥

रत्यन्तनिद्रालसलोचनानि स्तोकोन्मिषद्घर्मकणाङ्कितानि।
वक्त्राणि हर्म्याग्रजुषां वधूनामालक्ष्य यत्राप्सरसस्त्रपन्ते ॥१८॥

यावद्धनं यक्षपतेः पुरासीदद्यापि चाहुर्ननु तावदेव।
अतो वृथा भूरलकेति वेश्या हसन्ति नित्योपचिता यदीयाः ॥१९॥

यस्यां वहन्ती परिखायमाणा कलिन्दकन्या करिणां मदोघैः।
मज्जत्पुरस्त्रैणकुचैणनाभिपङ्कैश्च मिश्रा मलिनीबभूव ॥२०॥

सौधाग्रघातात्पतितान् यदीयरथ्यासु दृष्ट्वा शतशो विमानान्।
कर्मान्तिका श्रद्दधते न विश्वकर्माणमप्यादिगुरुं मयं वा ॥२१॥

घाटीभिरेव स्ववशे धरित्री कृत्वा समुद्रानपि निर्जयन्ति।
यस्यामयत्नेन हयाः खुरोत्थैः सान्द्रै रजोभिः स्थलतां नयन्तः ॥२२॥

प्राकारशृङ्गाग्रप्रतालिकासु लग्नं क्षणं रात्रिषु बिम्बमिन्दोः।
यस्यास्त्रिलोकीनगराधिराज्यचिह्नं सितच्छत्रमिति प्रतीमः ॥२३॥

स्वान्त पुरो याति निवतते च भ्रान्तस्य का वा मरुतो व्यवस्था।
अग्रे चलन्त्येव हयास्तु यस्यां रणेन पश्चात्पदमर्पयन्ति ॥२४॥

आरामपालादिविचारितैर्यदारामसालादिलताप्रसूनैः ।
समं वसन्ते च हिमागमे च कुर्वन्ति शच्याः कुसुमोपहारान् ॥२५॥

श्यामाच्छशोणाः सरितो हि तिस्रः सम्भूय मुक्तिं ददतीति वादः ।
शोणा तु नाच्छापि भवोचितैव श्यामार्कजा सा परिखा यदीया ॥२६॥

काशी पुरस्तादृशि दक्षिणस्यां काञ्ची पुरी द्वारवती पुरस्तात् ।
मायोत्तरस्यामतिमध्यदेशे राज्ञी परा सैव तु मुक्तिदानाम् ॥२७॥

क्रीणन्ति कैवल्यमपीह विप्राः क्रीणन्ति वैश्या धनदं च दासम् ।
क्रीणन्ति साक्षात् कुसुमास्त्रमेव वाराङ्गना वाग्भिरपाङ्गितैर्वा ॥२८॥

रत्नेषु हेमस्वथ कम्बलेषु क्षौमेषु वा स्याद् यदि नादभुताय ।
अत्रत्यमित्यम्भसि मारुतेऽपि कापि प्रतीतिः कियती न विद्मः ।२९॥

मध्यं कियद्योजनदूरमस्या वक्तुं न जानामि गृहाण किञ्चित् ।
उद्यन् रविः प्राचि किलैतदीये प्रतीचि साले पुनरस्तमेति ॥३०॥

तमीदृशीमन्वयराजधानीमावासयन् भूपतिरुग्रसेनः ।
आसप्तमादम्बुनिधेरभग्नैराज्ञाक्षरैः पालयति स्म साक्षात् ॥३१॥

पितेव बुद्धिं जनयन् हितेषु मातेव रक्षन्ननिवेदितोऽपि ।
सखेव शंसन् हृदयङ्गमानि प्रजाश्चिरं पालयति स्म देवः ॥३२॥

सुरानिव क्षोणिसुरान् प्रपेदे सुरान् पुनर्ब्रह्मधिया रराध ।
आत्मेति च ब्रह्म तदध्यवस्यन् चक्रे भवं कोशलतोऽपवर्गम् ॥३३॥

आद्यं धनं कीर्त्तिरसौ विवेकादय च दूरे विनयं विनेति ।
अध्यन्त राज्ञामुपदेशमुद्रामनुत्तमं तस्य चरित्रमेव ॥३४॥

स्वेनैव लोकाः प्रददुः करं यं स्वगुप्तये नद्य इवोपकुल्यम् ।
तेनैव पूर्णोऽजनि तस्य कोश आपस्ततैरब्धिरिवापगौघैः ।:३५॥

किं मन्त्रिभिः किं पृतनाभिरस्य धीचातुरीधैर्यनिधेस्तथापि ।
पोष्याः प्रजा वोढुमियत्तयाऽसौ चक्रे पृथक् तन्तमिवाधिकारम् ॥३६॥

सत्ये जनान् स्थापयतापि तेन शक्या न किञ्चित् कवयो नियन्तुम् ।
रामे महीं शासति रावणे वा माध्वी न तिक्ता मधुरो न निम्बः[1] ॥३७॥

---

१. बिम्ब इति—'ख' मातृकायाम् ।

सच्छत्ररेखैश्चरणैर्नृपालाः स्पृष्टा कथं विश्वसृजा तदैव ।
एकः पुनर्वाहयिता परे तु वोढार इत्यस्ति तु भावभेदः ॥३८॥

काले तिरश्चामपि जातिवैरं शशाम तस्मिन्निति नाद्भुताय ।
तले तदीयातपवारणस्य विशश्रमुर्यद्द्विषतां प्रतापाः ॥३९॥

चरन्नयं शाश्वतवीरधर्मपाणिन्धमेनैव पथा नरेन्द्रः ।
अज्ञातकालाध्वकृतोपमर्दमयातयामं च यशः प्रपेदे ॥४०॥

तस्यैवमुर्वीमनुशासतोऽपि धर्मेण राज्ञो जरतो बभूव ।
हिंसारुचिः कंस इति प्रतीतो (यथा) सुधाब्धेरिव कालकूटः ॥४१॥

चक्षोभ सिन्धुः परिपेतुरुल्का धूलि विना धूसरिता दिगन्ताः ।
ववासिरे वायसकङ्कगृध्रा दीप्तैः स्वरैर्दीप्तदिशं प्रपन्नाः ॥४२॥

पश्यन्निमित्तानि स दारुणानि शृण्वन् द्विजानां महतां च वादान् ।
पुत्रोपलभ्यैर्बहिरुज्जजृम्भे चन्द्रोदये सिन्धुरिवौर्वगर्भः ॥४३॥

अप्यर्चितास्तेन धनैरकस्मात् द्विजाः परिम्लानमुखा बभूवुः ।
औत्पातिकाम्भोधरगर्भमुक्तैरासिच्यमानाः कलमा इवास्त्रैः ॥४४॥

अतीत्य कौमारमधीत्य विद्याः सम्प्राप्यशस्त्रास्त्रकलासु निष्ठाम् ।
आरूढतारुण्यममुं नृपालः स यौवराज्ये सुतमभ्यषिञ्चत् ॥४५॥

तस्याभिषेकाम्बु सुगन्धिशीतं सुस्थां भुवं प्रज्ज्वलयाम्बभूव ।
क्षणाद्यथा वारिजनैः[1] प्रसिक्तं क्षारोपलं दाहविरामशीतम् ॥४६॥

सतोऽवमेने सचिवान्निरास बहिः प्रचिक्षेप सबन्धुवृद्धान् ।
अधार्मिकानात्मपरानभिज्ञानस्थापयत् सर्वपदेषु मूर्खान् ॥४७॥

अन्तर्विषीदन्नपि तस्य दोषानख्यापयन् किञ्चिदनन्यगत्या ।
यथोपपन्नाश्रमतो[2]ऽनुमोदी निन्ये स कालं निपुणं नृपालः ॥४८॥

भ्रातुः सुतस्याजनि देवकीति प्राक्सम्भवे यामिदति वदन्ति ।
प्रत्यगृहीदानकदुन्दुभिस्तां[3] प्राक् काश्यपः सम्प्रति यादवो यः ॥४९॥

---

१. 'वारिधरैः' इति युक्तः पाठः ।

२ श्रमितो—इति 'ख' मातृकायाम् ।

३. आनकदुन्दुभिः श्रीकृष्णजनको वसुदेवः । वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः' इत्यमरः १ १।२२

अभ्यर्च्य कन्यां हरणैरसंख्यैरारोप्य वैवाहिकयानमग्र्यम् ।
पत्न्या समेतां परिरभ्य तातः प्रस्थापयद् वाष्पगलैर्वचोभिः ॥५०॥

अथानुगच्छन् पितुराज्ञया तौ वधूवरौ मङ्गलतूर्यनादैः ।
कुतूहली हर्षकृते भगिन्याः कंसः स्वयं सारथिकर्म चक्रे ॥५१॥

सन्दर्शयन् निर्झरकन्दराणि सम्भावयन् जानपदोपहारैः ।
आनन्दयन् प्रेमकिरा गिरा तौ निनाय रम्येण पथा नृपालः ॥५२॥

अत्रान्तरे काप्यशरीरिणी वागासीदकालाशनिभीमनादा ।
यस्यां नियन्तासि रथेऽष्टमोऽस्या गर्भो नियन्ता भविता तवेति ॥५३॥

सा कर्णजाले[1] पतितेव तस्य[2] त्राणो मतिं व्याकुलयाम्बभूव ।
आवर्तितं दुग्धमिवाम्लसारो यत्नार्जितं धर्ममिवानुवादः ॥५४॥

अतोऽस्तु गर्भे निधने जनन्या मृतस्तरां स प्रथमोऽष्टमो वा ।
अद्यैव हन्यां भगिनीमिमामित्यादत्त सद्यः स करे कृपाणम् ॥५५॥

भीमेन तेनाथ कचे गृहीतां भीत्यैव नष्टां दयितामवेक्ष्य ।
प्रसादयन्नानकदुन्दुभिस्तं प्राबोधयत्कोमलयोक्तिभङ्ग्या ॥५६॥

स्थातुं क्षमोऽग्रे सुधियोऽपि कोऽपि शक्यो न लब्धुं[3] तपसापि यस्य ।
तस्यान्ततो भीरिति तर्क एषः कथं तव स्वान्तमुपाकरोह ॥५७॥

अथानुरोध्या तव राजनीतिराशाग्र्यमेतत् प्रथमं ममैव ।
गर्भो विनाश्यो न तपस्विनीयं शीर्षं विभेद्यं किमु शीर्षशूले ॥५८॥

आद्योऽस्तु मध्योऽस्त्वथवाऽष्टमोऽस्तु यं यं त्वियं गर्भ इति प्रसूते ।
तं तं प्रदास्यामि तवाग्रहस्ते शपे त्वयाहं सुकृतेन चेति ॥५९॥

क्रूरः प्रकृत्या चकितः स्वघातात् क्रुद्धःस्वतन्त्रः कुटिलश्च कंसः ।
साम्ना शमं तस्य दयाय कस्मादाज्ञाहरेरित्थमलङ्घनीया ॥६०॥

निर्ध्याय बुद्ध्यानिजयाऽथ कार्यमानीय तौ स्वांप्रतिराजधानीम् ।
आरात्स्वधाम्नो निगलावबद्धौ कारागृहे वासयति स्म कंसः ॥६१॥

अत्रान्तरे शक्रमुखाः सुरौघाः सम्पादयन्तो मुरहन्तुराज्ञाम् ।
अंशैर्निजैः सर्वगुणोपपन्नैरवातरन् पुण्यकृतां कुलेषु ॥६२॥

---

१. कर्णजा हे इति 'ख' मातृकायाम् ।
२. तस्या इति 'ख' मातृकायाम् ।
३. लुब्धं—इति ख—मातृकायाम् ।

नित्यानुपेता निधिरद्भुतानां निर्देशनिर्वाहकरी मुरारेः।
मायापि गर्भे वसुदेवपत्न्याश्चिक्षेप दैत्यान् षडनुक्रमेण ॥६३॥

कालेन गर्भं जनयाम्बभूव पत्नी यदा प्राथमिकं तदैव।
कंसायतं प्राभृतयाञ्चकार सत्याभिसन्धो यदुसार्वभौमः ॥६४॥

आनीललम्बायतमायताक्षमाविस्मितं पार्थिवलक्षणाङ्कम्।
बालं तमालक्ष्य चुकोप कंसश्चन्द्रं समुद्यन्तमिवाध्वनीनः ॥६५॥

आच्छिद्य बालं पितुरग्रहस्तादादाय चाङ्घ्रयोर्भ्रमयन्नभीक्ष्णम्।
शिलातले सम्प्रजहार कंसः मतङ्गजो मत्त इवेक्षुकाण्डम् ॥६६॥

समर्प्यमाणान् यदुपुङ्गवेन सत्याभिसन्धेन स भोजराजः।
पञ्चापि गर्भानपरान् भगिन्याः संहृत्य सिद्धार्थममन्यत स्वम् ॥६७॥

दैत्यः स्वयं दैत्यशिशुं जघान विनैव यत्नेन विदग्धमानी।
तेनैव तं घातयितुं प्रगल्भ माये नमस्ते मधुसूदनस्य ॥६८॥

देव्यास्ततो देवकनन्दनाया गर्भं[1] प्रपेदे भुजगाधिराजः।
फूत्कारवातैरपि भूर्भुवःस्वःभारावरोपे परिनिष्ठितो यः ॥६९॥

मासान् षडत्रैव सुखं वसन्तं माया हरेस्तं बहिरानयन्ती।
दिदेश गर्भे किल तत्सपत्न्याः प्रचक्षते यामिह रोहिणीति ॥७०॥

प्राप्ते फणीन्द्रे परगर्भकोशं प्राप्ते च गर्भे लघुतां जनन्याः।
विसिस्मियाते पितरौ विचित्रा जाताश्च सद्यो जनसम्प्रवादाः ॥७१॥

शोकेन निःशेषमदह्यतेति सुस्राव भोजाधिपतेर्भियेति।
कोऽप्येष रोगो ननु गर्भ एवेत्युत्पातभेदाः कवि नाम नेति ॥७२॥

आवेदितो बन्धनरक्षिवर्गैराकस्मिकं गर्भलयं भगिन्याः।
संशय्य धैर्यं पुनराजहार स सर्वधा सप्तमगर्भहान्या ॥७४॥

मासे मधोर्भ्रातरि माधवीयं शय्यामथासूयत रोहिणी सा।
संकृष्य गर्भान्तरसन्निवेशात् संकर्षणाख्याऽर्थवती यदीया ॥७४॥

अथाष्टमं गर्भमवेक्षमाणो दुष्टग्रहाविष्ट इवौग्रसेनिः।[2]
नाभुङ्क्त नावैक्षत राजतन्त्रं नारंस्त रामासु न वानिदद्रौ ॥७५॥

---

१. गर्भः' — इति ख—मातृकायाम्।

२. ०—सीनि' रिति—'ख' मातृकायाम्।

भाग्यैस्ततोऽमन्दधियां[1] जनानां भाग्यैश्च पाकाभिमुखैःकवीनाम्।
तत्त्वं परं कौस्तुभलाञ्छनं तत् कुले यदूनां चकमेऽवतारम् ॥७६॥

विचित्रैर्दानेज्या विधिभिरतिविश्वासविमलै—
र्विशुद्धे देवक्याः सुकृतनिलये गर्भनिलये।
तरङ्गैर्दुग्धाब्धोर्विधुरिव रमाकौस्तुभधरः
तदाद्यं तत्त्वानां प्रतिफलितमानन्दभरितम् ॥७७॥[2]

प्रावर्तन्त नदीनदाः शिवजलोत्पीडाः प्रसेदुर्दिशः।
प्रावर्षन् जलदाः फलैः शुशुभिरे पान्थप्रियैः पादपाः।
आवेधोगृहमारसातलमपि क्षीरैरिव क्षालितं
विश्वं कामपि शिश्रिये विमलतां विश्वम्भरस्योदये ॥७८॥[3]

इति श्री नीलकण्ठदीक्षितविरचिते मुकुन्दविलासे
रमारमणोदयो नाम द्वितीयः सर्गः समाप्तः ॥

—०—

१. ततो मन्द०—इति 'ख'—मातृकायाम्।
२. शिखरिणीच्छन्दः।
३. शार्दूलविक्रीडितमेतत्।

।। अथ तृतीयः सर्गः ।।

[सामोदवसुदेवः]

अथ तेजसि विश्वमङ्गले स्वयमासेदुषि गर्भशुक्तिकाम् ।
वदनं वसुदेवसुभ्रुवः परया शोभिकयाचन श्रिया ।।१।।

अलसालसलोचनं शनैरवसन्नाक्षरमाकुलालकम् ।
वदनं स निरीक्ष्य[1] पिप्रिये नयनासेचनकं नतभ्रुवः ।।२।।[2]

भरणेन पितुर्गरीयसी जननीत्यागमवेदिनो विदुः ।
भरणं च यदाश्रयेण तत् कुचयुग्मं गुरु सर्वतोऽभवत् ।।३।।

कुचकुम्भयुगं गुरुस्वतो गुरुकालेन च किं ध्रियेत तत्[3] ।
न भवेदपि गर्भमर्भको यदि गोवर्धनलब्धकन्दुकः[4] ।।४।।

तपनीयशलाकिकोपमा तरुणी दौर्हृदभारसन्नता ।
जरठस्थविधोरिव श्रिया जगृहे कामपि पाण्डुतां नवाम्[5] ।।५।।

द्रुतहेमविनिर्मलेऽथ तत् जठरे रोमलताऽपदेशतः ।
तनयः प्रतिबिम्बते स्म किं तरुणेन्दीवरवृन्दसुन्दरः[6] ।।६।।

शिरसा दधुरागमा हरिं मनसा चापि मुधा महर्षयः ।
जठरे तु दधानयाऽनया जगदाकीटपतङ्गमुद्धृतम् ।।७।।

उदरादमुतो ऽहमुत्पतन्नपि गोगोपकिशोरकस्त्रियः ।
जननीजठरे क्षिपामि नेत्यधिगर्भं शिशुरभ्यचिन्तयत् ।।८।।

कलितावसरे निजोदरे कमलाक्षे जगदन्तरात्मनि ।
अमरीभिरदृश्यमूर्तिभिः परिचेरे विनयेन भामिनी ।।९।।

---

१. अस्मिन् सर्गे सर्वत्र वियोगिनीवृत्तम् ।
२. 'पतिरीक्ष्य' इति ख—मातृकायाम् ।
३. तुलनीयम्—रघुवंशे ३।३
४. कन्तुकः—इति 'ख' मातृकायाम् ।
५. तुलतीयम्—रघुवंशे ३।७
६. तुल० रघु० ३।८

सुरसिद्धगणाः पदे पदे सुदृशं तामभिनन्तुमागताः ।
सुमनोभिरवाकिरन् शुभैरलिकस्वेदकणापदेशतः ॥१०॥

अपि दुग्धनिधावतृप्यतः कियती स्तन्यसुधा शिशोरियम् ।
इति चिन्तयतोरिवाभवन्मलिनं तत्कुचकुम्भयोर्मुखम् ॥११॥

अपि पर्वसु सन्धयोर्द्वयोरशरीरास्त्रिदशस्तवोक्तयः ।
श्रवणे परिपेतुरद्भुताः श्रमशोकापनुदा मृगीदृशः ॥१२॥

जय देवि जगन्निधेर्निधे जय सीदज्ज[1]गतीभयापहे ।
शरणं शरणं त्वमेव नस्तव दासास्तव पुत्रका वयम् ॥१३॥

तव निःश्वसितेऽधिकेऽधिके धरणी निर्भरमाश्वसित्यहो ।
अवसीदति ते बले शनैर्बलमुच्छृंखलमभ्युदेति नः ॥१४॥

असमग्रविभूषणापि सत्यखिलं भक्षयसे कुलं हि नः ।
भ्रम एष जगच्छ्रमापहः सफलस्ते भविता चिरादिति ॥१५॥

न ननाम दलं वटस्य यज्जितमप्याकृतिमात्रतः पुरा ।
जठरेण तदद्य निर्जितं जलजाक्ष्या जलजाक्षसंश्रयात् ॥१६॥

अपि गर्भगते जनार्दने तनुतामेव जगाम तत्तनुः ।
चरमा तनुरस्मि सन्ततिर्विहता हन्त मयेति चिन्तया ॥१७॥

विललास विनैव कारणं सुदृशः श्वासपरम्परा तदा ।
शयितस्य हरेरिवोदरे शयनीयोरगराजफूत्कृतैः ॥१८॥

हृदि यत्र निवेशितेक्षणं च्यवते भोगकथैव देहिनः ।
परमात्मनि तत्र गर्भगे सततं सा किल किं बुभुक्षताम् ॥१९॥

क्षितिभारपराचिकीर्षया क्षितिरेतद्वहनः फणीश्वरः ।
स्वयमत्र शयो जगन्निधिः सकलो मातुरयं कृतो भरः ॥२०॥

विबुधाहितधर्मसञ्चरो विरतः शार्ङ्गिणि देवकीसुते ।
इति हर्षमिवोपसूचयन् ददृशे धर्मविरामवासरः ॥२१॥

फलमोदकलाजवारुणीपशुदध्यम्भकरम्भपायसैः ।
ववृते वरुणार्चनोत्सवः शतशस्तत्र हलोपजीविनाम् ॥२२॥

---

१. 'जयसीदं०'—इति 'ख' मातृकायाम् । 'जयसि त्व' मित्यपि सम्भाव्यते ।

तपनातपतापि तन्नभः त्वमुपेहि त्वमुपेहि पूर्वतः ।
इति संवदतामिवोच्चकैः वधूते वारिमुचां महास्वनः ॥२३॥

सुहृदश्चलितान् यथायथं प्रसवार्तिव्यथितां च भामिनीम् ।
कलयन् मुखरे पयोधरे कलहंसो न मृतो न जीवितः ॥२४॥

परिपूर्णमुपोष्य वत्सरं प्रथमाम्भःकणिकाजिघृक्षया ।
समुदस्यति चातके मुखं कथमस्मिन्नपतत्करापलः ॥२५॥

जलधावनवेक्ष्य शार्ङ्गिणं जलदैरम्बुजिघृक्षया गतैः ।
चलितैरिव तं विमार्गितुं जगदापूर्यत सर्वतः क्षणात् ॥२७॥

ज्वलितक्षपितक्षणत्विषः स्वयमध्वधिगमाय केवलः ।
जलदाः परिवव्रुरध्वगान् जगदन्धङ्करणीषु रात्रिषु ॥२७॥

करकाशनिवैद्युतध्वनिस्तनिताम्भःपरिवाहशार्वरैः ।
बहुपान्थकुले विचक्रमे कुलटा रोद्धुमजागलस्तनैः ॥२८॥

सरितो मिलिता महार्णवैः न पृथक् प्रावृषि जज्ञिरे तदा ।
तदुपक्रममेव साध्यते कविभिः सिन्धुपदोभयार्थता ॥२९॥

अपलेपुरहर्निशे उभे न्यगिरन्निन्दुदिवाकरौ च ये ।
किममी जलदा उदासते विरहोद्भ्रान्तविवेकनिह्नवे ॥३०॥

करकाशनिघोषभीषिता जलदासारमरुज्जडीकृताः ।
प्रलये महतीव देहिनः सुषुवुः शार्ङ्गधरस्य मायया ॥३१॥

अथ जग्मुषि रोहिणीं विधावविलग्ने वृषभे जनार्दनः ।
अवतीर्य पुरा कृतार्थतामनयत् क्ष्मां बहुलाष्टमीदिने ॥३२॥

व्यगलन्निगलः स्वतस्तयोः सह दैत्यापसदोत्थया भिया ।
पुनरागतसत्त्वमुद्बभौ विमलज्ञानमयं विलोचनम् ॥३३॥

अथ तौ सुकृतैरपश्यतां परितश्छेदितदद्भुतं महः ।
अखिलैरपि शास्त्रविस्तरैरसकृद् घ्रातमलब्धसौरभम् ॥३४॥

(जलदौ)— घभयङ्करैः करैररिशङ्खासिगदाधनुर्धरैः ।
विटपैः फलभारभूषितैः विततस्निग्धमिवामरद्रुमम् ॥३५॥

प्रवहन्नदराजकन्यकापदलावण्यकणानुकारिणा ।
परितः कृतपीनवक्षसं मणिना जीवसमष्टिरूपिणा ॥३६॥

करुणार्द्रदिगन्तचुम्बितश्रवणान्दोलितरत्नकुण्डलम् ।
क्व वयं क्व विचिन्वते जना इति जातस्मितमीषदानने ॥३७॥

अतसीकुसुमाभमावृतं मृदुना हेममयेन वाससा ।
अभितश्छुरितं विकस्वरैररविन्दैरिव यामुनं ह्रदम् ॥३८॥
कनकाम्बरसुन्दरं ततो मणिकेयूरकिरीटसुन्दरम् ।
निजधातुनिसर्गसम्पदा निखिलं चैतदतीत्य सुन्दरम् ॥३९॥

चरणार्पितदृष्टिभिः स्वरैश्चकितैर्दूरत एव संस्कृतम् ।
प्रमदाद्भुतभक्तिगद्गदैर्वदनैस्तुष्टुवतुः स्वयं च तौ ॥४०॥

लिखितं क्व नु भाग्यमावयोरिदमीदृङ् निगडाववद्धयोः[1] ।
क्व नु पङ्गुरचेतनोपमः क्व नु गङ्गा विबुधालयं गता ॥४१॥

शरणं भव योऽसि सोऽसि नत्वदभिख्यामपि बोद्धुमीवहे ।
प्रतिभाति न किञ्चिदावयोः प्रमदाश्रुस्थगितेव लोचने ॥४२॥

त्वयि सन्निहिते किमुच्यतां क्रियतां किं किमिवाथ्यतामिति ।
अनभिज्ञतयार्थयावहे ननु कंसादभयं नृशंसतः ॥४३॥

इति संक्षुभितौ विलोक्य तौ वितरिष्यन्नकुतोभयं पदम् ।
(विततार)[2] पुरा कृतं तयोरपि तत्त्वं परमं तदात्मन. ॥४५॥

वसुदेव पुरासि काश्यपो भवती देवकि नाकिनां प्रसूः ।
तपसा परिशुद्धसत्त्वयोस्तनयत्वं भवतोरुपागमम् ॥४५॥

अहमस्मि विरामजन्मभूरवलम्बो जगतश्च तस्थुषः ।
परमार्थदृशा तु चिन्मयः परमानन्दघनः स्वयम्प्रभः ॥४६॥

द्युमहीप्रमुखं जडं जगद् द्रुहिणादीनपि चेतनाकणान् ।
अपदे प्रथयामि मायया मरुसीमासु महाह्रदानिव ॥४७॥

न यमैर्नियमैर्न संयमैर्न तपोभिर्न जपैर्न चेज्यया ।
तरितुं मनसापि शक्यते मम माया महती दुरत्यया ॥४८॥

विपदः कति सम्पदः कति प्रतिकाराः कति कल्युपप्लवाः ।
तमसि भ्रमतां भयानके कथमात्यन्तिकसाध्वसक्षयाः ॥४९॥

---

१. निगला०—' इति 'ख'—मातृकायाम् ।
२. बिवा'—०—इति 'ख'—मातृकायाम् ।

तदहं वितरामि साधनं तरितुं तच्च दुरुत्तरं तमः ।
यदिदं मम तत्त्वमीरितं तदजस्रं हृदये चकास्तुवाम् ॥५०॥

इदमेव वदन्त्यनुश्रुवा इदमेवोपदिशन्ति देशिकाः ।
अपि बुद्धमिदं परोक्षवत् प्रथते किन्तु चिरन्तनैर्मलैः ॥५१॥
युवयोस्त्विह मां प्रपन्नयोर्मदवष्टम्भविशुद्धसत्त्वयोः ।
न चिरं भविता परांमृते वपुरन्तस्तु परं प्रतीक्ष्यताम् ॥५२॥

सुत इत्यपि मां प्रपश्यतं सुचिरं निर्विशतं च तत्सुखम् ।
इति तावनुशिष्य माधवः वसुदेवं पृथगादिशत् ततः ॥५३॥
इति चेति च गच्छ गोकुलं मम मायामिति चेति चानय ।
इति चेति च तिष्ठ पूर्ववत् त्वमितो बन्धनतो विमोक्ष्यसे ॥५४॥

करणीयमशेषमग्रतः कथयन्नेव स इत्थमच्युतः ।
अखिलाशयदृष्टि·[मावहन्]··[सः पुनः]प्राप[शिशोःस]·रूपताम् ॥५५॥
असितालकमायतेक्षणं कमलान्तर्दलकोमलाधरम् ।
सुकुमारकराङ्घ्रिपल्लवं परिमृष्टं सुधयेव पार्श्वयोः ॥५६॥

परिरभ्य तमद्भुतं शिशुं परिचुम्बन्त्यसकृन्मुखाम्बुजे ।
अधिनोज्जननी स्तनामृतैरपुनान्मातृकुचार्थमात्मनः[1] ॥५७॥

समतिक्रमितुं हरेर्वचः सहसा नेतुमिमं च बालकम् ।
क्षणमप्रभविष्णुतां गतो वसुदेवः पुनराददे बलात् ॥५८॥

शिशुपादनखाग्रघट्टनात् प्रतिहारेषु मिलद्दृढ़ार्गलाः ।
न्यघटन्त कवाटिकाः स्वयं जलदध्वानतिरोहितस्वनाः ॥५९॥

स [2]चलन्नवगुण्ठिताननानपविद्धायुधकेशदोःपदान् ।
श्वसतः पतितान् पशूनिव स्वपतोऽरक्षत बन्धरक्षिणः ॥६०॥

सुवितत्य फणाः फणामणिद्युतिभिर्वृत्तपथः फणीश्वरः ।
बहिरुच्चलितं जुगोप तं वसुदेवाग्रकरस्थितं निधिम् ॥६१॥

अतिभीषणघोषसम्भ्रमद्विकटावर्तशताकुलामपि ।
यमुनाममुना तरन्नसावपि तीर्णं बुबुधे भवार्णवम् ॥६२॥

---

१. रपुनर्मातृ०—इति ख—मातृकायाम् ।
२. चलन्नवकु०—इति 'ख' मातृकायाम् ।

सुखसुप्तजनेऽथ गोकुले प्रविशन्नन्दगृहं ददर्श सः।
प्रसवार्त्युपजातकृच्छ्रया सह सुप्ताः सुदृशो यशोदया ॥६३॥

शयनेऽथ निरीक्ष्य दारिकां प्रभया प्राकृतदुर्निरीक्षया।
शिशुमग्रकरस्थितं च तं वसुदेवो भवति स्म विस्मितः ॥६४॥

न्यसतस्तमपोह्य बालकं वसुदेवस्य न विव्यथे मनः।
उपहृत्य कुमारिकाममुं दयितायै मुदमर्पयिष्यतः ॥६५॥

पुनरेत्य यथापुरं पुरं दयितायै तनयां प्रदर्शयन्।
विनिमातुमिमौ मिथः क्षमाविति वाचा सुदृशः स पिप्रिये ॥६६॥

अवमुच्य पुनश्च पादयोर्निगलन्तौ निभृतं न्यषीदताम्।
अरुदच्च तदान्तरस्पृशा ध्वनिनामन्द्रतरेण दारिका ॥६७॥

प्रतिबुध्य ततः ससम्भ्रमं दृढविद्धा इव दण्डघट्टनैः।
अवि [लम्ब]—गृहीतहेतयो विविशुर्वेश्मनि बन्धरक्षिणः ॥६८॥

कति (चिद् ब) हिरेव निस्सृताः कतिचिन्निश्चितसूतिमातृकाः।
कतिचित्तु निरीक्ष्य कन्यकामवरोधे नृपतेः प्रचक्रुशुः ॥६९॥

प्रचल प्रचलेति केचन त्वरयन्तो वसुदेवमुक्तिभिः।
प्रतिहारसिचं महीपतेरुरुनिर्ग्युस्तनयोपहारिणम् ॥७०॥

प्रतिबुध्य नृपोऽपि सम्भ्रमात् शिथिलाबद्धकचः श्लथाम्बरः।
क्व सुता क्व सुतेति मत्तवत् प्रलपन्नेव बहिर्विनिर्ययौ ॥७१॥

समभाषत शौरिरेत्य तं तनयेयं चरमा तपस्विनी।
भगिनी च तवापि याचते भवतो वाचि यदौ कुलस्थितिः।
इति याचत एव हस्ततः प्रसभादेष हरन् कुमारिकाम्।
जगृहे जगदेकवन्द्ययोः पदयोः पापमतिर्नृपात्मजः ॥७३॥

भ्रमयन्निखिलेन रंहसा भ्रमिताशेषचरामिमाम्।
धुरि यावदसौ न पातयेद् ददृशे सा दिवि तावदुद्गता ॥७४॥

प्रलयार्कसहस्रदुःसहा प्रदहन्तीव जगन्ति तेजसा।
अपि विच्छुरणैः स्वहेतिजैरहितानां नयनानि मुष्णती ॥७५॥

सुरसिद्धमहर्षिचारणस्तुति [सन्तान]—मथो निवार्य सा।
इदमाह विदग्धमानिनं जननाथापसदं जगत्प्रसूः ॥७६॥

अचिरेण वधाय ते स कोऽप्यवतीर्णो विषये तवैधते ।
यदि तां दिशमप्यवैष्यसि ··· ··· न चेद् द्विपात्पशुः ।

मतिमानसि कोशवानसि प्रथितं बाहुबलं तवाधुना ।
चतुरो यदि रक्ष जीवितं मयि तेन भ्रमते दुरीहते ॥७८॥
इति सा गृणती सुरै ··· ····· दमवाप दक्षिणम् ।
स च तप्तमतिर्विषादिनं[1] वसुदेवं वचनैरसान्त्वयत् ॥७९॥

अभ्यर्च्य तौ वसनभूषण [दानमानैः]
पित्रे निवेद्य निखिलं विषयं[2] शिशुं च[3]
तेजस्विनं[4] विचिनुतेति शशास चारान् ॥८०॥[5]

इति श्रीनीलकण्ठदीक्षितेन विरचिते मुकुन्दविलासे
सामोदवसुदेवो नाम तृतीयः सर्गः ॥३॥

———

१. विषादितं, विषार्दितम्०—इति—'ख' मातृकायाम् ।
२. विषये०—इति 'ख' मातृकायाम् ।
३. 'न०'—इति 'ख' मातृकायाम् ।
४. तेजस्विनौ०—इति 'ख' मातृकायाम् ।
५. वसन्ततिलकेयम् । द्वितीयः पादो मातृकायां न दृश्यते ।

।। अथ चतुर्थः सर्गः ।।

[व्रजोल्लासः]

आमनस्यजमतीत्य शासनैर्वैमनस्यमथ नन्दगेहिनी ।
पाटलोष्ठमरविन्दलोचनं पश्यति स्म परमाद्भुतं शिशुम् ।।१।।

उल्ललच्चरणपल्लवं मनागुद्यदिन्दुशतकोटिसुन्दरम् ।
तन्निरीक्ष्य तरुणोत्पलश्रियं सा जहौ निखिलमान्तरं तमः ।।२।।

नाकिरन् कुसुमवृष्टिभिर्भुवं नापि दिव्यपटहानवादयन् ।
कंसतस्तु चकिता गृहे गृहे गूढमुत्सवमवर्तयन् सुराः ।।३।।

दध्वनुर्जलधयो जयानकाः पेतुरम्बुधरपुष्पवृष्टयः ।
विद्युतः प्रणनृतुर्वने वने सञ्जगुर्मदकलाः कलापिनः ।।४।।

ईशदुन्मिषितकोशसम्पतत्पङ्कजप्रथमगन्धहारिणा ।
प्रेषिताः कमलयेव चाववुः शर्वरीचरमयामवायवः ।।५।।

सम्बभूव तनयस्तवेति गामादितस्समुपहृत्य कामपि ।
लेभिरे कति कति प्रियंवदा गास्सहस्रमयुतं च नन्दतः ।।६।।

आप्लुतो निखिलमङ्गलौषधिक्वाथतोऽथ पयसा गवामपि ।
निर्मलाम्बरधरो विवेश तन्नन्दगोपपतिररिष्टमन्दिरम् ।।७।।

तौ निरीक्ष्य पितरौ तमात्मजं विस्मयादुपरताखिलक्रियौ ।
हर्षवाष्पविगमान्तरे मिथः केवलं वदनमन्वपश्यताम् ।।८।।

स्वोचितेन विधि (ना शिशोस्तथा) जातकं मुनिरवर्तयद् गुरुः ।
को नु तत्र विधिराजसो भवेन्नामजातिरहिते परात्मनि ।।९।।

जातमेक्ष्य परतो (ऽथ) कालतो नन्दनं तदनु नन्दगोपतिः ।
[गोकुलस्य] जरतां कुलस्त्रियः स्तोकशश्चकमिरे सुतोदयम् ।।१०।।

नन्दगोपकुलमुन्ननाम तत् शार्ङ्गिणोऽवतरणभ्रमादपि ।
तत्त्वतः किमुदितं यदोः कुले सर्वतोऽभिनय एव तस्य यत् ।।११।।

सायमेव निपुणं निवेशितैः सूतिकाभवनदीपिकाग्निषु।
स्वैश्चरैरिव करैर्निवेदितः पद्मबन्धुरुदयाय सत्त्वरम् ।।१२।।

स्फारदुग्धदधिपूरमाबभौ पाररूपितशिलीभवद्घृतम् ।
क्षिप्यमाणनवनीतकन्दुकस्निग्धपिच्छिलपथं च गोकुलम् ॥१३॥

कम्बलांशुलतिकानियन्त्रितस्रं समानपतितामलभ्रुवि ।
सम्भ्रमोन्नमितदण्डपाणयो बभ्रमुः प्रवयसोऽपि गोदुहः ॥१४॥

उल्ललासकलरक्तवल्लवीगानमार्दवलयानुसारिभिः ।
हस्ततालनिनदानुमोदितै. शङ्खकङ्कणरवैर्न जोऽखिलः ॥१५॥

॥ असमग्रोऽयं ग्रन्थः ॥

———

संस्कृत-परिषत्प्रकाशनानि

***

१. संस्कृत कवियों के व्यक्तित्व का विकास–डॉ॰ राधावल्लभः त्रिपाठी, हिन्दी भाषायां समीक्षा-ग्रन्थः, पृ. ४०० मू. २५ रु.

२. वाल्मीकि-विमर्श–डॉ० राधावल्लभः त्रिपाठी, आदिकवेः कृतित्वसमीक्षणपरः संस्कृतभाषायाः प्रथमः प्रबन्धः, पृ. १००, मूल्य १० रु.

३. श्रीहर्ष के रूपक–डॉ० गोकुलप्रसादः त्रिपाठी, हिन्दी-भाषायां संस्कृत-नाट्यकार-श्रीहर्ष-विषये गवेषणात्मकः प्रबन्धः, पृ २५०, मूल्य ३० रु.

प्राप्ति-स्थानम्
संस्कृत-परिषद्, सागर-विश्वविद्यालयः
सागरम् ४७०००३ (म० प्र०)